Reprint from the Journal of the Travancore University Oriental Manuscripts Library

No. 18

KAVIMANORAÑJAKACAMPU

OF

SĪTĀRĀMASŪRI

PUBLISHED BY

THE CURATOR,

THE UNIVERSITY MANUSCRIPTS LIBRARY,

TRIVANDRUM.

TRIVANDRUM

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1950.

Price Rupee One Annas Eight.

KAVIMANORAÑJAKACAMPU

OF

SĪTĀRĀMASŪRI



PUBLISHED BY

THE CURATOR,

THE UNIVERSITY MANUSCRIPTS LIBRARY

TRIVANDRUM

TRIVANDRUM .

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,

1950.

DONATED TO
TTD CENTRAL LIBRARY

INTRODUCTION

The *Kavimanorañjaka* is a *kāvya* belonging to the class of *campūs* which deal with the pilgrimage of some noteworthy person and the glory of the places visited, the best known work of this type being the *Yātrāprabandha* of Samarapuṅgavadīkṣita[1]. The work is divided into four *ullāsas* and describes the birth, education and the pilgrimage of a great *bhāgavata* by name Sītārāma.

From the account given about the hero in the beginning of the work, we are able to know that a Brahmin by name Śeṣādri belonging to the Śrīvatsa gotra and living in the village Vedabhṛṅga in Kanchi undertook a long pilgrimage and in the end settled at Palamadai (पयःप्रणालीनगरम्)[2] in the Tirunelveli district; his son Veṅkaṭarāma married Sītā, daughter of Sītārāma; and to them was born Sītārāma, the hero of the work[3]. His education in Vedas and Śāstras is then described[4]. The rest of the first *ullāsa* and the other three *ullāsas* are devoted to the description of the pilgrimage of the hero. The chief places visited are Nanguneri (देवनायकस्थलम्)[5], Tirukkurungudi (कुरङ्गम्)[6], Cape Comorin, (दुर्गास्थलम्)[7], Trivandrum (स्थानन्दूरम्)[8], Varkala (जनार्दनक्षेत्रम्)[9],

1 As instances of other works of this type mention may be made of *Vibudhānandaprabandha* of Veṅkaṭakavi and *Śrutakīrtivilāsacampū* of Sūryanārāyaṇa (MSS. of both of which are available in the Govt. Oriental MSS. Library, Madras) and *Manavikramabhūpālacarita* of Vedāntarāmānuja (MS. Trivandrum, No. 888). The last named work is in nine *stabakas* and describes the pilgrimage of Mānavikrama, a Zamorin of Calicut, who visited Palani, Madura, Rameśvaram, Śrirangam and other places. Its date is not known, but it does not appear to be very early, and there is little of any historical interest in it.

2 pp. 12 — 13. 3 p. 14.
4 p. 17. 5 p. 18.
6 p. 18. 7 p. 19.
8 p. 20. 9 p. 21.

Udupi (रजतपीठपुरम्) [10], Mukambi (मुकाम्बिकापुरम्) [11], Gokarna [12], Poona [13], Pandarpur (पण्ढा) [14], Panchavati [15], Samantapanchaka [16], Kurukshetra [17], Mathura [18], Haridvar [19], Badarinatha [20], Kedaranatha [21], Nepal (काम्पिल्यम्) [22], Mithila [23], Ayodhya [24], Sringivera [25], Chitrakuta [26], Benares [27], Gaya [28], Jagannatha [29], Bhadrachala [30], Kalahasti (श्यामवारणधरणीधरः) [31], Tirupati (शेषाचलम्) [32], Kanchipura [33], Sriranga [34], Madhurai [35], Setu [36], Rananatha [37], and Alwartirunagari (कुरुका) [38]. After the pilgrimage Sītārāma returned to Palamadai and narrated to his parents all his experiences during the journey [39]. He then visited Tirunelveli (शालिवाटिकापुरम्) [40], Banatirtha [41] and Srivilliputtūr (अभिनवधन्वीपुरम्) [42] and finally settled at Thintiruperai (श्रीवेरा) near the famous Alwartirunagari in Tirunelveli District, being instructed to do so by sage Agastya and the River Tamra(parni) in a dream [43]. The work closes with an account of the religious activities of the hero at Sribera.

From other sources we are able to know that this Sītārāmaguru continued as a *naiṣṭhikabrahmacārin* throughout his life, that he was greatly responsible for the propagation of the Bhāgavata cult in the Southern districts and that though he was a *Smārta* by birth, his leanings were more towards the cult of Rāmānuja. It is said that he took to

10 p. 22.
11 p. 23.
12 p. 24
13 p. 25.
14 p. 25.
15 p 27.
16 p. 28.
17 p. 29.
18 p. 30.
19 p. 31.
20 p. 32.
21 p. 32.
22 p. 33.
23 p. 34.
24 p. 34.
25 p. 43.
26 p. 43.
27 p. 44.
28 p. 45.
29 p. 46.
30 p. 47.
31 p. 48.
32 pp. 49 — 59.
33 p. 59.
34 p. 65.
35 p. 67.
36 p. 68.
37 p. 69.
38 p. 70.
39 pp. 72 — 73.
40 p. 74.
41 p. 75.
42 p. 75.
43 p. 75.

saṁnyāsa of the *tridaṇḍi* type in Śrī Rāmānuja's order, and passed away in about 1882 A. D. Most of his life was spent at Thentiruperai and he had disciples even at such distant places as Mysore.

The author of this *Campū* is a namesake of the hero and from what he tells us about him in the work itself, we understand that he belonged to Garga gotra and was the son of Rāmakṛṣṇa[44] and grandson of Raghunāthasūri[45]. His father's maternal grandfather was a Veṅkaṭarāmasūri, the author of *Rāmavilāsa*[46]. Among his teachers was one Rāma[47].

From the descendants of the author we are able to know some more details about him. He was born at Tirukkurungudi in the Tirunelveli District in 1836 and he was named 'Sītārāma' after the hero of the work, as a result of whose blessing he was born. He was well-versed in Vedas and Śāstras and was a great exponent of the *Śrīmadbhāgavata*. He was an *upāsaka* of Hayagrīva and this is believed to have been responsible for his supreme talents in *Bhāgavata-pravacana*. Besides this *Kavimanoraṁjaka*, he has also written a commentary on the *Śrutigītā* and a small poem named *Śṛṅgāramañjarī*. He was popularly known as Rāmasvāmi Śāstrin of Tirukkurungudi and the guru Rāma mentioned in the work is Kalladaikurichi Rāma Śāstri, the father of Chandrasekhara Sastri, the late Principal of the Mylapore Sanskrit College, Madras. He passed away in 1906. The late MM. Dr. T. Ganapati Sastri was a nephew and disciple of the author.

The work, as is seen from the colophon at the end[48], was finished on 19th Viśākha, 1045 M. E. (1870 A. D.) and the last verse in it[49] indicates by *kaṭapayādi* notation the number of verses in it to be 333 (गोलीला) and the prose passages 166 (चिन्तक). It shows the author as a fairly good poet but observing the poetic conventions rather too closely.

44 p. 3.
45 p. 2.
46 pp. 2—3.
47 p. 3.
48 p. 89.
49 IV. 76.

and delighting in artificial conceits. He is particularly fond of descriptions – descriptions of cities like Sribera[50], Trivaudrum[51], Poona[52], Benaras[53], Tirupati[54], Kanchi[55] and Sriranga[56], of rivers like Ganga[57], seasons like spring[58] and Summer[59] etc. The work is also studded with *stotras* on the deities of the temples visited, those on Padmanābha[60] and Śrīnivāsa[61] being instances. The whole story of the *Rāmāyaṇa* is beautifully summarised in the second *ullāsa*[62]. The author seems to be very partial in the usage of artificialities like *śleṣa*, *virodhābhāsa* and *yamaka*.

The present edition is based on two manuscripts in this Library. The first is No. 348, a palm-leaf manuscript written in Tamil grantha script and procured from Nareri mana, Kutallur, Malabar, and the other, No. 12983, a paper manuscript written in Devanāgari script, supplied by Sri T. K. S. Sastri, Electrical Mains Engineer, Trivandrum, the grandson of the author of the work[63]. The latter manuscript was available only after the matter was sent to the Press, and since no important variation in reading is noticed, the variants have not been given in this edition.

The author has also written a commentary on the work, and a manuscript of this is available in this Library, MS. No. 312, palm-leaf, procured from the same source as the first of the manuscripts of the work mentioned above.

S. VENKITASUBRAMONIA IYER.

50 pp. 3 — 8.
51 p. 19.
52 p. 25.
53 pp. 44 — 45.
54 pp. 52 — 55.
55 pp. 59 — 60.
56 pp. 65, 66.
57 p. 31.
58 pp. 49 — 52.
59 pp. 61, 62.
60 p. 19.
61 p. 68.
62 pp. 34 — 42.
63 We are indebted to Sri Sastri for also supplying us the information relating to the author of the work and the hero in addition to what is contained in the work itself.

॥ श्रीः ॥

सीतारामसूरिविरचिता

कविमनोरञ्जकचम्पूः ।

लक्ष्मीधाम विशालनेत्रयुगलं त्वां नौमि सीतापते
पद्मोद्भासितवक्षसं गुणनिधिं श्रीवत्सशोभितम् ।
भक्ताभीष्टदमम्बुदाभमनिशं त्वत्पादभक्तीप्सया
तां मे देहि सरोरुहाङ्घ्रियुगल ! श्रीराम ! राज्याधिप ! ॥ १ ॥

सीते ! चिन्तितपूरणातिनिपुणैः कल्याणकृद्वीक्षणै-
रेनं तावकपादपङ्कजरसास्वादैकबद्धस्पृहम् ।
मातः ! प्रापय कामितार्थनिवहं हंसासनाराधिते !
नित्यं मद्धितां नतिं त्वमुररीकृत्यादराद्धर्षिकतः ॥ २ ॥

यत्पादाब्जप्रसूमरसुधापानबद्धादराणां
नृणां वाणी प्रवहति पुनाद्यत्कृपादृष्टिपुष्या ।
शान्तस्तापो भवति भजतां रिक्तनामम्भवोऽयं
सीता सा मे कलयतु गिरां सम्पदां चाभिवृद्धिम् ॥ ३ ॥

दत्त्वाद्याण्यधिविश्य मे करुणया नं ते विलासं वचः
पद्यैर्गद्यविमिश्रितैर्विरचितं हृद्यं बुधानां रसैः ।
युक्तं भावविशेषशोभितमहं त्वां भारतीं नौमि तां
वीणागानविलासलोलरसिकां वर्णस्वरूपां सदा ॥ ४ ॥

यत्संसेवनतो जयन्ति सुधियो विद्वत्सभायां जना
यत्सेवानिरतो हरौ भगवति प्राप्नोति भक्तिं दृढाम् ।
यत्सेवा विबुधेभ्य ईप्सितवरं दत्तेतरां तद्धि मे
सीतारामगुरोः पदाब्जयुगलं वाचां प्रवृद्धयै भवेत ॥ ५

कृष्णाध्वरीन्द्रः कुशलाय मेऽस्म-
त्कूटस्थसूरिः कृतुकी स भूयात् ।
भेजुर्मखे यस्य च निर्जरेन्द्राः
पीयूषधिक्कारि हविः प्रजातम् ॥ ६ ॥

यदीयवाचालहरी सभायां
प्रचारकालेषु विजृम्भमाणा ।
पयोधिपूरोल्लसमानवीची-
प्रचारदोराहवसाभिलाषा ॥ ७ ॥

अनादिवाणीधरणीधरं यं
बुधेश्वराश्चादरतो वदन्ति ।
पितामहो मे करुणावतारः
स सन्ततं कौतुकमातनोतु ॥ ८ ॥

विदां प्रसङ्गेषु वदन्ति यं वै
गिरां पतिं तं रघुनाथसूरिम् ।
समाश्रये यः प्रथितो रघूणां
नाथः स एवायमिति क्षमायाम् ॥ ९ ॥

मातामहोऽस्मत्पितुरेष धीमान्
शेषादिमानां वचसां रसज्ञः ।
शेषतरं तोषमहर्निशं स
पुष्णातु मे वेङ्कटरामसूरिः ॥ १० ॥

आम्नायचूडारससेविसेवां
चिकीर्षुरग्रे कृतिनस्तदीयान् ।
वन्दे तदीयेरितमादरेण
कुर्वन्ति ये शेखरमेव नित्यम् ॥ ११ ॥

तातो मे सुचिरं जयी भवतु यः सद्व्रातचूडामणि-
श्चेतो यंस्य चकास्त्यपारकरुणावाराशिपूरोल्लसत् ।
धत्ते यः सुतरामनादिवचसामुत्तंससारे रतिं
सोऽयं गर्गकुलाब्धिशीतकिरणः श्रीरामकृष्णाभिधः ॥

क्षेमाय मे वेङ्कटरामसूरि-
र्भूयात् स भूमा विलसन्मनीषः ।
यं सत्कवीन्द्रं कथयन्ति लोके
यो निर्ममे रामविलासकादीन् ॥ १३ ॥

भव्याय भूयान्मम कृष्णसूरि-
र्योऽयं व्यतानीच्छुकभाष्यटीकाम् ।
अस्मद्गुरोः पादसरोजराज-
च्चेतोमिलिन्दः परब्रह्मतुष्टः ॥ १४ ॥

अमन्दमोदं मम संविधत्तां
शुकाभिधोऽस्मद्गुरुरेष नित्यम् ।
निरूढतत्तन्मततूलजातं
यदुक्तिवात्या शिथिलीकरोति ॥ १५ ॥

निरपायवचःसदनीभवन्
भवतु रामगुरुर्मम शर्मदः ।
फणिपालकजैमिनिगौतमो-
दितवाचोम्बुधिवीचिविघर्षधीः ॥ १६ ॥

मलयानिलसोदरीतटे
विलसत्यद्भुतसौधशालिनी ।

नगरी कमलालयातनोः
शफरीभूषणपालितानिशम् ॥ १७ ॥

यदीयसौधप्रतिमा लसन्त्यो
हस्तोल्लसत्काञ्चनपूर्णकुम्भाः ।
गीर्वाणराट्केलिवनद्रुमाणां
स्वयोषितः सेचनिका विरेजुः ॥ १८ ॥

सुधामयान् सौधकृताधिवासान्
समीक्ष्य यत्केसरिणो नितान्तम् ।
सुरद्विपो नूनमरातिभावा-
दालानमुन्मूल्य पलायते स्म ॥ १९ ॥

समीक्ष्य यत्सौधकृतान् पतत्रिणः
सुपर्वराट्केलिवनाधिवासिनः ।
विहङ्गमाः स्वीयमनीषया ध्रुवं
रागाद्बभूवुः परिरब्धुमुत्सुकाः ॥ २० ॥

यदीयसौधालयसालभञ्जिका-
विलासिनीनां प्रतिबिम्बमुल्लसत् ।
वियत्तटिन्यां ध्रुवयम्बरालया
अमंसतामर्त्यवधूर्विगाहिनीः ॥ २१ ॥

कान्ताप्रसङ्गोत्सुककातराक्ष्यः
प्रासाददीव्यत्कमनीयमञ्चाः ।
प्रसाधनव्यग्रतया नितान्तं
वातायनायातसुधागभस्तिम् ॥ २२ ॥

कराञ्चलेनाञ्चलमाक्षिपन्त्य-
स्तस्वीजनोद्दीपणसादरक्षणाः ।

अकुर्वत स्फाटिकदर्पणभ्रमाद्
ध्रुवं समुद्धृत्य कलङ्कितं पुरा ॥ २३ ॥

यच्चन्द्रशालासु विलासशालिन-
स्तारापिकं निर्जरदीर्घिकाम्बुजः ।
मत्वा तदङ्के विहृतिंभरान्वहो
पश्यन्ति मुग्धाः शशमेव सारसान् ॥ २४ ॥

यत्सौधकूटेष्ववलम्बमाना
स्तारा विरेजुस्तरलेक्षणानाम् ।
आलोक्य वक्त्राणि निजेशभावा-
दक्षाणि तानीव समागतानि ॥ २५

उदग्रयत्स्फाटिकगोपुराग्रे
संवीक्ष्य सन्ताननगस्य बिम्बम् ।
इष्टार्थपूर्त्यै परिपूजायिष्यन्
हासास्पदं कोऽपि समाकुलोके ॥ २६ ॥

सन्ध्यासु यत्सौधकृताधिवासा
तमोभयाद्यत्र सुधांशुबिम्बे ।
मुग्धाञ्जनैर्लाञ्छनमारचय्य
चित्रं ध्रुवं मोहमगाहतैका ॥ २७ ॥

यदीयसौधाग्रविहारभाजो
मयूरराजो विरजोऽहिबुद्धया ।
तुदन्त्यमर्त्याधिपकेलयटव्यां
लता लसत्पादपवेष्टमानाः ॥ २८ ॥

यदीयसौधे विहृतिं भजन्त-
श्चकोरपोता अवरुह्य तस्मात् ।
सुधामयूखस्य मयूखधाराः
पिबन्ति सञ्जातमहाप्रमोदाः ॥ २९ ॥

यदीयसौधाचलकूटवासाः
शुद्धान्तवर्गाः सुरराड्वधूभिः ।
विभावनामेव भजन्त्यजस्रं
विलासिसम्पद्गुणतोऽतिरेकात् ॥ ३० ॥

अणूदरीणां मणयः प्रभेजुः
शिरोगृहे यत्र वसन्त एव ।
फलानि भारादवलम्बमान-
प्रकाण्डशाखामरपादपानाम् ॥ ३१ ॥

नारीं सभां यन्नगरे विभान्तीं
दृष्ट्वा सुधर्मां बत यौगिकार्थाम् ।
त्रपापरीतेव सभामरी सा
रूढा वरीवर्ति महाबिलेऽस्मिन् ॥ ३२ ॥

यत्पत्तने राजति पादपानां
पुष्पेषु राजन्मकरन्दधाराम् ।
मत्वा दिवौकःसरिदम्बुपूरं
धर्तुं समायात इवेन्दुमौलिः ॥ ३३ ॥

प्रासादाग्रविराजत्सु प्रदरेषु वियद्धुनी ।
यस्मिन् विसृत्वरी रेजे चन्द्राश्मस्यन्दिपूरवत् ॥ ३४ ॥

यत्पत्तने केलिवनावनीरु-
डग्रीणशाखाग्रलसत्फलान ।
सुपर्वराट्सौधशिरश्चकासत्-
सौवर्णकुम्भा इव संविरेजुः ॥ ३५ ॥

यत्पत्तनोद्यानसमुल्लसन्तो
रुन्धन्ति पृथ्वीजविमानमार्गम् ।
सज्ञातिवैरा इव भूरुहोऽमी
काण्डातिरेकेण विवृद्धसत्त्वाः ॥ ३६ ॥

यस्मिन्नुपादाय फलानि पादपाः
शाखाग्रहस्तेषु दिदृक्षया विभोः ।
स्वेषामधीशस्य कुटुम्बसंयुताः
संरेजिरे यान्त इवादराद्गिरेः ॥ ३७ ॥

यत्पत्तनोद्भासितनालिकेरा
आदाय ताम्रासलिलं फलेषु ।
तत्सोदरीस्वर्गसरिद्वरायै
सन्दर्शयन्तो विलसन्ति नूनम् ॥ ३८ ॥

नूनं यदाराममहीरुहाणा-
मास्वाद्य गीर्वाणगणः फलानि ।
तत्याज सम्प्राप्य परामपूर्वां
तृप्तिं सुधामप्यतिलोभनीयाम् ॥ ३९ ॥

तुषारधरसोदरीभवदुदग्रसौधावली-
समुल्लसितभार्गवीतनुपुरे स तस्मिन् वसन् ।
सरोरुहनिवासिनीसहचरो विधत्तांतरां
समस्तकुशलानि मे मकरभूषणः सन्ततम् ॥ ४० ॥

विलोभनीया विविधैर्विलासैः
कथावधूटी विबुधेशसेव्या ।
गुरोः समाकर्षति मामकीनं
मनो विषण्णं स्वयमद्य चित्रम् ॥ ४१ ॥

पीयूषपूरस्त्रिदशैकभोज्यः
सेव्यो न सर्वैश्च जडोपनीतः ।
पीत्वा तमाप्नोद्बलभेदमन्यो
भवेत्सुधा तत्र समाप्यनेन ॥ ४२ ॥

पद्मालयेशस्तु सदानवारिः
प्राचीनवैरी किल गौतमोऽयम् ।
आस्ते प्रचेताश्च सदा जडेशः
सौमित्रिरग्रेऽपि सतां सरामः ॥ ४३ ॥

धर्मात्मजो भीमगुणप्रशंसी
सुराधिनेता शमनस्सुरारात् ।
स राजराजोऽभवदुग्रमित्रं
खगाधिराजो हरिबद्धवैरः ॥ ४४ ॥

हर्योरसोऽभूद्बलानुकूलः
पाञ्चालिकाभोगरतश्च नित्यम् ।
वल्मीकजन्मा मुनिसार्वभौमो
रमानुषङ्गं कलयन् समिन्धे ॥ ४५ ॥

कुम्भोद्भवस्तापसमूरिसेव्योऽ-
यं दक्षिणाशापरिपालकोऽभूत् ।
व्यासः श्रुतिर्द्वोऽपि पराशरस्य
पादानुषङ्गं कुरुते प्रसन्नः ॥ ४६ ॥

अथ च चन्द्रमाः कलानिधिरपि कुवलयानन्ददोऽपि कमलालय-वैरितां कुरुते स्म, सर्वज्ञशिरः कलयाम्बभूव वासं, दोषाकरश्च समभूत् । कुमुदाकरोऽपि राजसानुरागं भावं भजति स्म । कमलाकरोऽपि राजविरोधितां लभते । विश्वस्रष्टापि विधिः विश्वामित्रवरप्रदो बभूव । अर्जुनानुरक्तोऽपि देवकीतनयः अर्जुनोत्पाटनमादरतश्चकार नन्दनभङ्गं पत्रिवरेण कारयामास मानिनीनिमित्तं च । कृष्णानुरक्तोऽपि सङ्कर्षणः हलाग्रेण समुदित-दुरोषं कृष्णाकर्षणमकरोत् । महावराहोऽपि दंष्ट्रकोटिविपाटितधात्रीतनुः । अर्थिसार्थप्रार्थितार्थविश्राणनबद्धकङ्कणोऽपि तरणिसन्ततिमाश्रितोऽपि रघुनाथः पराजरामार्गणोल्लासमखण्डयत् सागरबन्धं सानन्दं चकार । कलानिधिमौलिरपि क्षितिभृदध्यक्षोऽपि भवानीवल्लभः हिमालयमाक्रामति पदा क्षुब्धको बभूव दुर्वासाः समभूत् ।

स्वायम्भुवोऽपि मनुः कर्दमे किल कमनीयगुणां कन्यकां प्रीदात् । नहुषः खलु चक्रवर्त्यपि सुरालयाधीशतामचीकमत । हरिमेधसुतोऽपि हरिः गजेन्द्रं विनोदयन् समुन्नतिमवाप । तापसेश्वरोऽपि च्यवनः सुकन्यामचीकमत भोगाभिलाषया । भीमोऽपि हिमानीधरः कलयति कीचकोल्लासम् । चन्दनभूधरोऽपि भुजङ्गपुङ्गवसंश्रितः खलु नितान्तम् । मान्धातृतनूजोऽपि मुचुकुन्दाग्रजः पुरुकुत्सो बभूव । जगत्प्राणोऽपि समीरणः प्रथितः किल मातरिश्वेति । पुण्यश्लोकोऽपि नलचक्रवर्ती परमहंसं परिचर्यापरं रचयांबभूव । कलानिधिकामधेनुकल्पकोत्पाद-कोऽपि रत्नाकारः कलानिधिशेखरविषये समदाद्धालाहलं सकोलाह-लम् । सुकृतरक्षणमुद्भूत इति पुथुलाभिख्योऽपि पृथुः वृषविरोधं चकार । जह्नुर्मुनिकलशोद्भवावपि गङ्गासागरपायिनावभूताम् । कविरपि समभूद् गुरुविद्वेषी । धीमत्तमोऽपि धिषणो धत्ते खलु कौशिक-पालनकौतूहलम् । चिरमन्धृतपातिव्रत्यापि पद्मालया सततं समभूत्प-रपुरुषसङ्गाभिलाषिणी । भीममहीमहेन्द्रसम्भूतापि दमयन्ती नलविषये चैकल्यशतमनुबभूवतराम् । कामक्ष्यपि विरूपाक्षमभजत कामाभि-तप्ता । धर्मैकनिरतापि पुलोमजा गोत्रभिदं भर्तारमचीकमत । तादित्थं नास्त्यस्मिन् गुरुवर्ये पुरातनेष्विव श्लेषभङ्ग्यापि दोषोत्पादनम् ॥

अयं तु—

प्राचीनहारेषु गुणस्य भङ्गं
रागं रमेशस्य कथासुधायाम् ।
पाठक्षणे विग्रहमर्थतृष्णां
व्याख्यानकालेषु बहुप्रकाराम् ॥ ४७ ॥

काव्येषु बन्धे प्रभयाकुलत्वं
गृध्रेशसम्पातिकथाप्रसङ्गे ।
भुजङ्गसङ्गेषु मुदं गिरीशे
प्राकृण्विशीर्षेषु तमःप्रवृद्धिम् ॥ ४८ ॥

उपोषणे भासुरसत्त्वभङ्गं
रजःसमृद्धिं वरकेतकीषु ।
गलीमसत्त्वं चिकुरेषु यूनां
द्विजिह्ववाञ्छामहितुण्डिकेषु ॥ ४९ ॥

भवानुरागं धनदे प्रमोदं
मध्वागमे सैष मिलिन्दवृन्दे ।
दुर्गाश्रयं दुर्बलमेदिनीशे
विनायकोपासकतां पृदाकौ ॥ ५० ॥

अद्वैतवाञ्छां मनसः सरोरु-
ण्णिवासिनीकान्तपदारविन्दे ।
सर्वज्ञनिन्दामपि दक्षगाथा-
प्रसङ्गकाले न परत्र लेभे ॥ ५१ ॥

गद्यपद्यमयवाग्भिरिदानीं
सन्मुदं हि रचयामि नितान्तम् ।
आर्यवर्यगुणदुग्धसरस्व-
द्वीचिरम्यनिलयायितचेताः ॥ ५२ ॥

दोषान् परित्यज्य गुणान् महान्तो
गृह्णीयुरस्मिन् रससारविज्ञाः ।
धाराधराः सैन्धवसिन्धुबन्धा-
वम्भो हि पीयूषसमं पिबन्ति ॥ ५३ ॥

भजताऽजडाशयविनिर्मितो (गुरो)-
र्विबुधेश्वरस्य कृपयापि मौलिताम् ।
भजति स्म सैष हि कलानिधिः स्वयं
स्वकरान् दिशासु सततं प्रचारयन् ॥ ५४ ॥

सारग्रधानो विबुधस्तु लोके
मन्येत बालोद्भवतां न चास्य ।
पङ्कोद्भवत्वं मनुते मरालः
पद्मस्य किं सौरभमेव रम्यम् ॥ ५५ ॥

हृष्यन्त्यसन्तो न हि चेदनेन
तेनास्य को वा समभूनिकर्षः ।
पद्माकराणां प्रवदन्ति क वा
दोषाकरानादरतोऽपकर्षम् ॥ ५६ ॥

असद्धिरस्मिन् पिहितेऽपि चास्य
प्रकाशनेनैव भवेद्विरोधः ।
दिनाधिपे हस्ततलेन रुद्धे
भवेत् किमेष प्रतिरुद्धभानुः ॥ ५७ ॥

प्राचीनकाव्येष्वपि सत्सु लोके
ग्रन्थं दधीरन् तमिमं महान्तः ।
सत्स्वापगाकोटिषु चन्द्रमौलि-
र्धत्ते हि गङ्गां विबुधेशसङ्गात् ॥ ५८ ॥

प्राचीनसूक्तिरससङ्ग्रहनिर्मितापि
किं नाद्रियेत विबुधैर्मम सूक्तिरेषा ।
नानाप्रसूनमधुलेशकृतं तु लोके
माध्वीकमञ्चितरसं रसिकास्त्यजेयुः ॥ ५९ ॥

स्फुटेतरार्थापि कवीन्द्रसूक्ति
र्भजेत नूनं कमनीयभावम् ।
लभेत किं वा कलकण्ठवाणी
न रम्यतां माधवभासमाना ॥ ६० ॥

स्वदेत काठिन्ययुतापि लोके
क्वचित्कवीनां कमनीयसूक्तिः ।
शिरीषमृद्वीरमणीयरूपा
क्वचित्कुचेऽलं कठिना न किं वा ॥ ६१ ॥

चिरन्तने सत्यपि काव्यरत्ने
मुदं लभन्तां नितरां महान्तः ।
अनेन राजत्यपि तारसङ्घे
चकोरडिम्भा विधुनैव नूनम् ॥ ६२ ॥

सीतारामगुरोश्चरित्रजलधिः क्वाहं मनीषाल्पकः
कैवं चेदपि तत्कृतौ गुरुकृपा मां चोदयत्यद्भुता ।
तत्कामं मम पूरयन्तु गुरवः सीता ससीतो गिरां
देवी तानहमाश्रये सुरनुतान् वाणीविलासाप्तये ॥ ६३ ॥

काञ्चीमण्डलभूषणं श्रुतिमतीतीरेऽग्रहारो महान्
सोऽस्त्यद्यापि महोच्चसौधसहितो वाणीविलासास्पदम् ।
यत्रत्या निगमान्तनीरजपरिष्यन्दन्मरन्दद्विजा
लोलम्बा इव यत्पिबन्ति सततं तद्वेदभृङ्गाभिधः ॥ ६४ ॥

ग्रामेऽस्मिन्नवसत्पुरा द्विजवरः श्रीशेषशैलाभिधो
यज्ञैः प्रीतिकृदन्वहं रघुपतेः सोऽयं कदाचित्सुतैः ।
सत्रा तन्त्रचतुष्टयेषु निपुणैर्लक्ष्मीकलत्रान्वित-
स्तीर्थस्नानविधौ चकार धिषणां विद्यातपःसम्भृतः ॥ ६५ ॥

स हि खलु परमभागवतः शेषाद्रिराजावशादुदारकर्मणो वरदस्य देवदेवस्य भीमादिभिरिव धर्मानुसारिभिः प्राणैरिव पञ्चभिः सहितः स्वहितैरात्मजैराश्रितलोककलुषाचलकुलिशमधिरुह्य वेङ्कटाचलं तत्र च निमज्य पुनः पुनः स्वामिपुष्करिणीवारिणि स्नातृजनपाप-

हारिणि दिनमणिदेदीप्यमानोर्ध्वपुण्ड्रपरिमण्डितनिटिलदेशः तुलसी-मणिमालिकोल्लसितवक्षस्थलः कमलासनकामशासनपाकशासनप्रभृति-पीयूषरसाशनसमुदायमौलिमणिशाणकोणकषणादिव तरुणारुणसारथि-भासमानचरणारुणनीरजराजमाननखरमणिगणघृणिभासितहरिदन्तरं पादावनतपरिजनादिदृक्षयेव किञ्चिदाकुञ्चितपूर्वकायं सीतापतिमिव सुग्रीवाङ्गदराजमानैः परिजनैः संसेव्यमानपादारविन्दं कटितटभासित-कनकाम्बरं तं भगवन्तमम्भोरुहवासिनीकान्तं संसेव्य नितान्तं सान्ते-वासिजनसन्ततिः परिसर एव तस्य सेवारसभरितो यामिनीमिमामनी-नयत् ॥

तदानीं खलु सामोदं सरसीरुहवासिनीनिवासनिदेशतः स हि देशतोऽस्मादधिगत्य रङ्गनायकनगरं कावेरीलहरीपरिकल्पितकाल्यो-चितक्रियाकलापः सुपर्णालङ्कृतमपि अपर्णालङ्कृतं चतुराननचातुर्य-धुर्यमभिदृश्य साश्चर्यं विमानं रङ्गनामानं तत्र च वरपन्नगवरपर्यङ्क-शायिनमभिवन्द्य भगवन्तं तमनन्तगुणसरस्वन्तमनन्तरमधिगत्य सेतुं नितान्तमानन्दरसभरितान्तःकरणः करुणारसवरुणायतनः तरुणी-सहितः समुपेतस्तनयवरीणै रमणीयगुणैरवगाह्य तत्र पुनः पुनरम्भो-निधिं प्रसादैरिव जालकोपेतैश्चम्पुग्रन्थैरिव स्तवकावभासितैर्निधिपति-निलयैरिव परिपुष्टव्यष्टिविशेषैः पादपप्रवरैरतिरमणीयं दशरथवद्दुष्टक्षेत्रैः राधेयवद्वदान्यैः रोहिणीकान्तवज्जैवातृकैः दिवाकरैरिव तमोनुद्भिः भूपालनिलयैरिव ललामोल्लसमानैः विप्रवरैरभिमण्डितमाससाद पयः-प्रणालीनगरम् ॥

तत्र वेङ्कटरामेण सत्रा पुत्रेण कर्हिचित् ।
शेषाद्रिः श्रीधराकान्तमस्तावीन्मङ्गलेश्वरम् ॥ ६६ ॥

आकर्ण्य सादरमुदारवचस्तदानीं
श्रीशेन तथ्यवचसा कथितं महात्मा ।
धन्यीकृता स्म भवता करुणार्णवेने-
त्युक्त्वाथ तत्र नगरे स चिरं त्ववात्सीत् ॥ ६७ ॥

सीताभिधामथ स वेङ्कटरामनामा
मानव्युमादितिसमां महिमोज्ज्वलाङ्गीम् ।
भूलोकदिव्यशुभमङ्गलदीपिकां तां
कान्तामुवाह निजतातनियोजनेन ॥ ६८ ॥

सीतारामतनूजया सह तया सीताख्यया सात्त्विकान्
धर्मानागमचोदिताननुदिनं कुर्वन् यजन् सादरम् ।
सोऽसौ सद्गुणवारिधी रघुवरं कारुण्यपाथोनिधिं
तस्यां सञ्जनयाम्बभूव सुधियः पुत्रांश्च पुत्रीस्ततः ॥६९

यातेषु हायनगणेषु कदाचिदेषा
तोषादधत्त खलु वेङ्कटरामसूरेः ।
सीताथ शेषधरभूषणभक्तिमान् यं
वेदान्तसारगुरुमेनमथो विरेजे ॥ ७० ॥

कुम्भमासि भरणीं श्रयत्यतः
शीतभासि तरुणीमनन्तरम् ।
तारणाय धरणीसुपर्वणा-
माविरास सहसा गुरुत्तमः ॥ ७१ ॥

तदा तु किल —

लोकबान्धवमहोदयं ध्रुवं
वीक्षितुं क्षितितलेऽथ नूतनम् ।
पूर्वमेव तरसारुणोदया-
दाजगाम खलु मन्दमारुतः ॥ ७२ ॥

आजगाम सहसारुणोऽपि तद्
बालकोदयनिरीक्षणादृतः ।
मित्रभावमुपजग्मुषां परं
युक्तमेव भवतामिदं किल ॥ ७३ ॥

अर्भकोदयमथार्भकाम्बुदा
वीक्ष्य सादरमुदारचेतसा ।
दिक्षु तत् प्रथयितुं क्षणेन किं
कम्बुरम्यनिनदानकुर्वत ॥ ७४ ॥

सत्कान्तबालोदयमिन्दुरादरा-
दाश्रित्य हर्षादिव वृद्धिमन्वभूत् ।
नूनं तदीशस्य सदात्मजोऽयं
लोकप्रसिद्धं खलु वृद्धिदायकम् ॥ ७५ ॥

बाल एष भविता त्रयीपथे
बादरायण इवापरः स्वयम् ।
इत्यमी हुतभुजस्त्रयः क्षणा-
ज्जज्वलुर्बत घृताप्लुता इव ॥ ७६ ॥

आशानिवारणगुरोरुदये नितान्त-
माशाप्रसादमभजन्निति तन्न चित्रम् ।
श्रीपादकान्तकमलं समुपाश्रितानां
नैकान्तमित्रमिति शत्रुरपीर्यते हि ॥ ७७ ॥

वत्सवंशकलशाब्धिमौक्तिकं
बालकं क्षमभिवीक्ष्य तं जवात् ।
आपगाः समगमन् स्वनायकं
किं नु तत्सदृशमौक्तिकेच्छया ॥ ७८ ॥

द्विजराजसमृद्धिकारके ऽस्मिन्
सुमनोभिः समये समभ्यहर्षि ।
ग्रथिताः सुमनःप्रियङ्करा(स्ते)-
द्विजराजा इति विष्टपेषु नूनम् ॥ ७९ ॥

सा दृष्ट्वा तनयस्य तस्य करयोश्चक्राब्जरेखादिकं
तुष्टाभूज्जनकस्य हृष्टमनसा जातस्य जातक्रियाम् ।
विप्रैः साकमरुन्धतीश्वरशतानन्दायितैः सादरं
कुर्वन् स्वर्णगवादयद्य सहसा तेभ्यः ममोदं तदा ॥ ८० ॥

कलत्रमित्रेण ततः स्वपित्रा
सत्रेति गोत्राधिबुधैरकारि ।
बालो भविष्यद्गुरुरेष सीता-
रामाभिधा तस्य गुरोर्दिने किम् ॥ ८१ ॥

अथ कदाचित् श्रीवत्सान्वयदुग्धवारिधिकलानाथमाबाल्याद्धरिचरणारविन्दगाथारसलोलं जननीपीतपीताम्बरादद्भुतगाथामृतस्तोमं पिबन्तं स्तन्यैकतवात् मूर्तिमन्तमिव मानवानन्दं नन्दनन्दनमिव यशोदयालङ्कृतं, पाणिनितन्त्रमिव रूढपादोपेतं, न्यायसिद्धान्तमिव प्रख्यातगुणविशेषं, मीमांसाशास्त्रमिव धर्मजिज्ञासापरं, वेदान्तमिव परतत्त्वनिर्णेतारं, ग्रहगणमिव बुधानुयातं, लक्ष्मणमिव सुमित्रानन्दनं, कैलासमिव शिवालयं, विनायकमिव दानभोगसम्पादितरामणीयकं, मानससर इव महाराजतहंसकं, मेरुगिरिमिव कनकमेखलं, नन्दालयमिवावदातगोकुलं, सत्काव्यमिव सुवर्णभासुरं, नभोमण्डलमिव दर्शनीयहस्तश्रवणं, अनिरुद्धमिव श्रीकुमारभूषापरिमण्डितं सीतारामाभिधमतिसुकुमारं कुमारं मातापित्रादयो राजतनूजवत् आदरतो नितान्तमुपलालयांचक्रुः ॥

एवमेव यातेषु बहुषु दिवसेषु स जनको निखिलजनमनोरञ्जकः विविधलिपिविशेषवैदुष्यशालिना कामाद्यमित्रवित्रासनवरासिना अनुदिनमतिशायिवरविग्रहरुचिभासिना सरसीरुहवासिनीनिवासपदसारससेविना समाश्रितजनपङ्केरुहभानुमालिना कुसुममालिना शेषासनचरणनलिनगाथारसमात्राभिलाषिणा प्रियभाषिणा वावदूकमदपरम्परापहारिणा मणिहारिणा मनीषिजनवाञ्छितविद्याविशेषविश्राणनगीर्वाणतरुणा गुरुणा समुचितसमयरचितचौलोपनयनेन तेनात्मजेन क्षीराम्भोधिमिलक्ष्मीकान्तेन, वृन्दारकलोकमिव मन्दारपादपेन, रजताचलमि-

उद्यानव्रातमिव वसन्तेन, प्रसवभरमिव सौरभेण, कल्याणधरणीधरमिव गीर्वाणतरङ्गिणीपूरेण, समर्थकविकाव्यमिवार्थान्तरन्यासेन, सरस्तल्लजमिव नीरजेन, प्रभातसमयमिव प्रभाकरेण, केदारकदम्बमिव धान्येन धन्यममन्यत वंशमात्मनः सोऽयम् ॥

एवं गच्छति काले स गुरुपुङ्गवः सनातनसरस्वतीप्रमुखकलाकलापपरिशीलनजनिताभिलाषः मृगेन्द्र इव गिरिकन्दरान्निर्गम्य निजमन्दिरादानन्दरसतुन्दिलमानसः समासासाद गुरोः सदनम् ॥

तदानीं तु समये समुचिते रचितोपनयनमधिगतविनयं तनयं वेङ्कटरामगुरोर्नयनोपहारमिवावनीसुराणां, सङ्केतनिलयमिव निखिलकलाविलासिनीनां, विग्रहमिव मनीषिजनमनीषाविशेषाणां, भागधेयमिव शिष्यसन्ततेरुद्वीक्ष्य प्रमोदभरपाथोनिधिमध्यमध्यासीनः अदसीयमहिमसीमान्तनिर्धारणबद्धादरोऽपि अनधिगतमनोरथः तदीयगुणगणबध्यमानमानसः स्वाभ्यस्तचतुस्तन्त्रसिद्धान्तनिर्धारणबद्धान्तःकरणानन्तान्तेवासिजनसंसेव्यमानः सेवमानभवनमनोरञ्जकः स गुरुकुञ्जरः समभूदसौ समुपदिदिक्षुराम्नायसारार्थानन्यानपि तन्त्रार्थान् ॥

तदानीमेव देशिकवर्यादस्मादधिगतसर्वार्थं सतीर्थ्यगणसर्वार्थबोधनसमर्थमनितरविचक्षणविलोभ्यमङ्कुरयन्तमाक्षेपसार्थं निचयं समाधानानां रचयन्तमत्यर्थं अधरीकृततन्त्रकदम्बसमुज्जृम्भमाणमनीषिजनधिषणाविशेषमेधाविलासभासमानतया कणचरणसमीरणचरणाग्रणीप्रभृतिराद्धान्तप्रवर्तकतापसव्रातसमीभावमधिवहन्तमनिराकरणकरणसञ्चयवारणमदवारणवरवेत्रैः कमनीयकामिनीकामनीयतमगात्रैः, चिरन्तनसूक्तिसीमन्तिनीभाषितवंशवदवक्त्रैः, कामादिमविषवल्लीलवनलवित्रैः, साहित्यपद्मिनीपरितोषणमित्रैः, कणचरणसमीरणचरणाग्रणीप्रभृतिसूक्तिमौक्तिकनिकरप्रोतनसूत्रैः, कलिमोहग्रहपटलसमुच्चाटनमन्त्रैः, वल्कलवरनेत्रैः संसारतरङ्गिणीरमणसन्तरणवरणीययानपात्रैः, चिरतरपरिशीलितसच्छास्त्रैः छात्रैः सततमासेवितमिवीक्ष्य तमेतमात्मजातं जातामोदः समजायत तातः स हि वेङ्कटरामः सरामः ॥

तदानीं तु.—

वेदव्रातविरुद्धसूक्तितरुणीवेणीकृपाणीभव-
द्वाणीदुग्धतरङ्गिणीशशरणीभूतान्तरङ्गो गुरुः ।
कारुण्यार्णवकौस्तुभान्तरसदासञ्चारशीतीभव-
त्स्वान्तः स्वां मतिमातनोत्रिपथगायात्रामिषाद्रक्षणे ॥ ८२ ॥

तत्क्षणमव क्षोणीगी र्णगजपरिणीयतमचरणारविन्दो देशिकोऽस्माकं सुकृतसार्थतमधनसमर्थतमतीर्थसार्थेरमवगाहनरचितास्थः प्रस्थाय ततः पयःफेनालीनगरीमवगत्य देवनायकस्थलं गगनाचलं पङ्कजतामरसाकरः स्निलनगाद्य मुहुर्मुहुः द्वादशोर्ध्वपुण्ड्रप्रोल्लसितफालादिदेशः [illegible] लोलोल्लसिते, भृगुवत्स इव सभृगौ, कैलास इव सविनायके, पङ्कज इव प्रभाकरराजमाने, धर्मपुत्र इव विलसत्सभे, जलधाविव लक्ष्मीभृति, भूरिवत्सज इव मार्कण्डेयमण्डिते, सुमेरोत्सुकमण्ड [illegible] इव सिन्धुकेलालङ्कृते, उर्वीधरायितदर्वीकरेन्द्रमण्डलसिंहासने विराजमानं, वनमालास [illegible] हसितमुखीतिलोत्तमाभ्यामप्सरोभ्यामभिसेव्यमानं [illegible] जनाभ्यां, निजभक्तजनावनजागरूकं, गजाधिपसंसेवितमप्यगजाधिपसंसेवित [illegible] रमालालितमप्यरमालालितं, लोकनायकमप्यलोकनायकं, गगनाचलनायकं यशोदानन्दनमिव सुदर्शनमोचनकलितानन्दमभिवन्द्य, च देवनायकमानन्दितमानसस्तुष्टाव तमिष्टं भगवन्तम् ॥

तदनन्तरं श्रीवत्सान्वयनन्दनवनसन्तानः सन्ततमाश्रितजनसन्तानः नन्ददृब्रुन्दारकवृन्दरघुनन्दनानन्दनसामन्दानन्दमनिन्दापदवीदवीयान् धराब्रुन्दारकदेशिकोऽस्मदेशिकः प्रस्थाय ततो देवनायकस्थलादार्यावर्तमिव सिन्धुसंराजमानमभियौ कुरुक्षेत्राभिधानं क्षेत्रम् ॥

तदनन्तरमवगाह्य त्रिपथगं सिन्धुधुनीं कृपासिन्धुर्मन्दरधरपादारविन्दगाथामकरन्दसमास्वादनसन्तृप्तनिरतिशयानन्दो देशिकोऽस्माकं प्रभाकरसन्तानमिव सीतेशोल्लसमानमासाद्य भगवन्मन्दिरमाश्रितजनबन्धुं लोकत्रयत्राणधुरन्धरमाश्रितजनाचञ्चलानन्दसन्दायिनं तुलसीपद्मकुन्दकलिनोत्पलमल्लिकानवमालिकाप्रभृतिप्रसूनवरमालाभिरुल्लासिन - [illegible] मनेकब्रह्मकोटिनिकरायनं श्रीपूर्णनामानं निर-

ज्ञनं निर्विकल्पं निरामयमप्रमेयं रमाप्रियं भगवन्तं तं सम्प्रणम्य पुनः पुनः संस्तूय सानन्दमुवास तत्र कतिचित्कालम् ॥

प्रस्थाय ततो गत्वाथ दुर्गास्थलमवगाह्य तत्र पयोराशिं शुभगुणराशिं हरिकथापारायणप्रवीणः वीणामुनिवीक्षणानन्दोल्लासनसत्कमलालालसमन्दिरमानसः स हि देशिकः [illegible] मकुटकेयूरकाञ्चीकाञ्चनाम्बरहारनूपुरपरिशोभितं, [illegible] सनाभिकाभरणरत्नचक्रेण विराजमानं, सेवकजनवाञ्छितदानसन्तुष्टमानसादुपायितपादारविन्दमभिवन्द्य कन्यां कात्यायनीं, [illegible] संसेवमानो नानायतनानि नारायणस्य सुन्दरशरीरमिव विलसद्विमलप्राकारवन्तं, कैलासमिव विलसच्छ्रीकण्ठेश्वरं, श्रीकृष्णमिव सभृङ्गारं, वपुरनिलयमिव विलसद्बलं, श्रीरङ्गमिव मणिमण्डपं, [illegible] कावेरीनदीनेन पारावारेणेव वाहिनीपतिना [illegible] षट्पदेन मेदिनीदारिणा रक्ष्यमाणं, निर्झरसीकरशीतलं गुरुन्द्रमिव गोवृन्दोल्लसितं सरस्वन्तमिव राजशेखरलालितं धवलांशुकपरिवारसंरञ्जितं, भारतसमराङ्गणमिव अर्जुनमहारथोद्भासितमासाद्य श्रीरङ्गपुरं पञ्चाप्सरसपरिकल्पितकाल्योचितक्रियाकलापः, मुरारेरुत्कोरसन्यमिव गाङ्गेयकान्तं, त्रिदिवनगरमण्डनाकदम्बमिव विचित्रवितानसम्प्राप्तस्वर्गभावमासाद्य मन्दिरमरविन्दनाभस्य वृन्दारकमौलिलालितपादारविन्दं, वन्दारुजनवृन्दानन्दनमन्देतरप्रमोदं, सेवासमागतसुरनरवरवर्ण्यमानगाथाशतं, प्रावृट्श्रियेव उत्तुङ्गपयोधरया पयोदमालयेव बिलसद्वारया सुकीर्त्येव विनतानन्दनकलितारया रमया संशोभितं दिवाकरयतिसाक्षात्कृतं तं भगवन्तं सम्प्रणम्य पुनः पुनः तत्सन्दर्शनसञ्जातकुतूहलः समस्तावीत् ॥

आदौ वेदगणैरभिष्टुतगुणो यो लोकनाथो हरिः
सृष्ट्वाण्डं प्रथमं तदन्तरुदकं तस्मिन् विराड्रूपधृक् ।
शेते नाभिसरोजपत्रपुटके यस्यास्ति लोकत्रयं
वन्देऽहं तमशेषसेवितपदं श्रीपद्मनाभं सदा ॥ ८३ ॥

संसेव्य कल्याणगुणाम्बुराशिं
सीतापतिं श्रीनरसिंहमार्यः ।

भक्त्याथ संस्तूय च नन्दसूनुं
.नितान्तमानन्दितमानसोऽभूत् ॥ ८४ ॥

इत्थं व्यतीतेषु कतिपयदिवसेषु कदाचन स्वफाल्गुनोत्सवमहाऽभृथे खगपतिसमारूढः खड्गखेटधरसार्वभौमवरभासमानपुरोभागो भगवानम्भोरुहनाभः समभिययावम्भोनिधिमवगाहितुं तदीयमहोत्सवदर्शनसमानन्दितमानसोऽम्मदार्यश्च ॥

नाथः पङ्कजनाभ एष नृहरिश्रीनन्दजाभ्यां युतः
श्रीनारायणनामधेयगदितं वाच्यं जनानां श्रुतम् ।
अद्य स्पष्टयितुं महानवभृथव्याजान्मदीनां पतेः
सस्नावम्भसि तेन नः सह गुरुस्त्रैव सस्नावयम् ॥ ८५ ॥

तदनन्तरम्—

नवद्विवादित्रगणेऽभिघुष्टे
रथेभपत्त्यश्ववृतैः सहैतैः ।
विहङ्गमेशत्रयभासमानै-
र्नृसिंहनन्दात्मजपद्मनाभैः ॥ ८६ ॥

प्रविवेश पुरीं पुनर्गुरुर्मे
विविधैर्मौक्तिकतोरणादिभिः ।
सफलैः कदलीधरारुहैश्च
विलसन्तीं च वरां मनोहराम् ॥ ८७ ॥

कतिचिद्वासरान् सोऽयमुवासात्र पुरोत्तमे ।
कुतुकी कञ्जनाभाङ्घ्रिसरोरुहनिरीक्षणे ॥ ८८ ॥

इति सीतारामसूरिविरचिते कविमनो-
रञ्जके प्रथमोल्लासः ।

अथ द्वितीयोल्लासः।

अथ कदाचिद्देशिकोऽस्माकं सीतारामनामा दक्षिणमधुरापुरवास्त्येन गोत्रादित्येन केनचिदौरस्यायितवयस्येन सत्रा सुत्रामपुरीतरङ्गिण्यवगाहनरचितास्थः प्रस्थाय पुरान् स्यानन्दूरपुरात् दुस्तरसंसारसागरनिमज्जज्जननौकायितपदपङ्कज आजगाम जनार्दनक्षेत्रम्।

तत्र खलु—

स्नात्वा चक्रसरोवरे च जलधौ श्रीरामबाणोदके
कृत्वा माधवपूजनं स कुसुमैः स्थित्वा श्रुतिद्रुस्थले।
अम्भोजासनसप्ततन्तुमवितुं कारुण्यपाथोनिधि-
र्योऽसावाविरभूज्जनार्दनमयं संसेव्य तुष्टाव तम् ॥ १ ॥

तत्राथ भक्तप्रवरेण केनचित्
सम्मानितस्तेन सह द्विजन्मना।
अस्मद्गुरुः सद्गुणवाहिनीपतिः
तत्पार्थसूतस्थलमाययौ मुदा ॥ २ ॥

तं पार्थसूतं स्वकृतैः स्तवैर्गुरुः
संसेव्य संस्तूय निजेष्टदायिनम्।
तस्य प्रसादं समवाप्य भक्तित-
स्तस्माद्ययौ क्षेत्रवराणि तद्युतः ॥ ३ ॥

तदानीं खलु—

यत्र यत्र गुरुरेष सञ्चरेत्
तत्र तत्र निवसज्जनान्ययौ।
भक्तिमार्गमुपादिश्य मोचयन्
वीरुधोऽपि पदपद्मरेणुभिः ॥ ४ ॥

महाबिलं वीक्ष्य रवौ यियासौ
तुलां गते हीण इवास्मदार्यम्।

स निस्तुलं सह्यमहीधराजं
महीजराजिं समगान्महात्मा ॥ ५ ॥

तदनु देशिकोऽयं पाञ्चालिकावदुल्लसन्कटकार्जुनं, पाञ्चालदेश-मिव द्रुपदविराजमानं, महादेवमिव हैमवतीसमुल्लसितं सगुहं च, विराटमहीपमिव सम्राट्कीचकालयनं, पाराशर्यमिव शाखासहस्र-भासुरसारोल्लसितं, त्रिदशालयमिव सुपर्ववंशं, पातालभुवनमिव सुरसो-ज्झासितं, श्रीरामचन्द्रमिव हरिवरशरणं, पञ्चास्यमिव बहुकेसरं, सुदर्शनमिव विलसन्नेमिजातं, मेदिनीन्द्रनन्दनमिवामोदितधात्रीसमाजं, नभोमण्डलमिव जीमूतमण्डितं, सिन्धुराजमिव [illegible]धर्ववरसमिन्धमानं, मत्तमातङ्गमिव श्रीहस्तिनीकान्तं, रतिरम्यमदनानन्दिनं, इन्द्राणीव विहितवृषानन्दं, वाद्यसमुदायमिव [illegible]ष्टस्वरं, निधिभेदमिव महा-पद्मं, पाणिनीयतन्त्रमिव विचित्रप्रकृतिप्रत्ययोपेतं, सह्याचलं, तदनु तत्तटमासाद्य नक्षत्र इव विधुकान्ते, गौतम इव गोतमानन्दयुते, नीला-म्बुद इव सोमोल्लसिते, रत्नराशाविव कुम्भकालङ्कृते, निशीथ इव सज्योतिःसहिते कावेरीभासमानभागमण्डलदेशे त्रिवेणीसङ्गमसवन-त्रयावगाहनार्द्रकपिशजटानिचयः कृतनैयमिको न्यवसदष्टरात्रम् ॥

तद्राजा बहुमानितः सह ततस्तेनास्मदार्यास्त्रिभिः
तत्कालागतविप्रराजिषु महापुण्यैश्च पृथ्वीसुरैः।
यातो यादवभूधरं गुणनिधिं नारायणं सेवितुं
श्रीमद्यादववंशदुग्धजलधेः सोऽनङ्कराकेश्वरम् ॥ ६ ॥

तदनन्तरम् —

पतगपतिसमर्पितपयःपारावारपन्नगपर्यङ्कराजमानजलजनाभ-भासमाननानामणिवरशालिमौलिसमुल्लसितं, आश्रितजनसरस्वदा-लिङ्गनानन्दितापारकृपापगं, पतङ्गपतिमिव विनतानन्दनं, धर्मपुत्र-मिव फाल्गुनोत्सवानन्दिनं सम्प्रणम्य श्रीनारायणं तुष्टाव च सन्तुष्टः पुनः पुनः तमिष्टं भगवन्तम् ॥

श्रीनारायणसेवनप्रविलसत्स्वान्तोऽस्मदार्यो महान्
तस्मात्तैर्द्विजपुङ्गवैः सह धरात् प्रस्थाय देवोत्तमम् ।

स्कन्दं क्रौञ्चकुलाचलेन्द्रभिदुरं कौमारधारानदी-
तीरस्थं प्रथयौ प्रगम्य विविधं तं देशमालोकितुम् ॥ ७ ॥

राजीवराजन्मकरन्दपाना-
दुन्मत्तभृङ्गावलिराजमानम् ।
वल्लीशवत् संश्रितनीलकण्ठं
देशं ददर्श द्विपराजराजिम् ॥ ८ ॥

तदनु ऊर्जपूर्णिमायामासाद्य कतिचिद्दिनै रजतपीठपुरमाश्रितवान्मल्याति[illegible]यादिभिरेतैरिह पुरः मधुरायां मकुटकटकमकरकुण्डलकेयूरकाञ्चीकाञ्चनाम्बरादिविभूषणविभूषितं, तुलसीकमलोत्पलमल्लिकामालतीचम्पकज[illegible]तीप्रभृतिसुमनस्तातिभिः शोभितं कस्तूरीतिलकोल्लसमाननिटालं, कुङ्कुमपङ्कानुरागरुचिराङ्गं, सरोवरमिव लक्ष्मणाकान्तं, वृत्तमिव यतिरञ्जितं श्रीकृष्णमासेव्य भगवन्तं, स्तुत्वा च विविधैः स्तवैः अनुदिनमनवच्छिन्नरसावेशभरितैः गोडपल्लीपार्श्वस्तत्रोवास वासरान् पञ्चदश ॥

प्रस्थाय तस्मादुरुमनोमो-
दैर्मित्रैश्चतुर्भिः सहितो महात्मा ।
कोटीश्वराख्यं बहुपुण्यलभ्यं
क्षेत्रं पुरारेरभिवन्द्य यातः ॥ ९ ॥

तदनन्तरमतीत्य कुम्भकाशीं सरसमारमचक्राह्वपरपुष्टकाककेकिभारद्वाजैः करिवरकोलादिभिश्च पक्षिमण्डितमासाद्य कोलूराभिधदेशमनुग्रहलवमात्रेण मूकानपि पण्डितान् विदधतीं वेधोमुखसौधोल्लासिनीं निखिलबुधजनाराधितपादपीठां मुखाम्बिकां बहुकृत्वः समासिषेवे ॥

ततोऽस्मदार्यवर्यस्तामायां संस्तूय नैकधा ।
त्रिवासरमुवासात्र कुतूहलितमानसः ॥ १० ॥

प्रस्थाय तस्माद्गुणवारिधिर्गुरुः
क्षेत्रप्रवेकं सह तैर्द्विजन्मभिः ।

गोकर्णसंज्ञं तमयं ययौ महा-
पुण्येन लभ्यं तपसां परं पदम् ॥ ११ ॥

गोकर्णमूर्तिं गिरिजेष्टमेनं
संसेव्य तुष्टाव गुरुः स तत्र ।
अभीष्टदं शिष्टजनेभ्य इष्टं
हृष्टं रमेशस्य सुरेशजुष्टम् ॥ १२ ॥

को वा वर्णयितुं शक्त आदिगोकर्णमद्भुतम् ।
यत्र त्रिरात्रतपसा प्रत्यक्षीक्रियते शिवः ॥ १३ ॥

तदनन्तरं वाराणसीपुरमिव शेखरीकृतगङ्गोद्भासितं, चिन्तामणि-मिव चिन्तितप्रदं, स्वनायिकाश्लेषणसमासक्तेनेव तटिनीपतिना पुनः पुनः प्रसारिततरङ्गकरैरालिङ्गितगङ्गाधरमन्दिरप्राकारं, विविधविचित्र-गृहादिविराजितं क्षेत्रमालोक्य गोकर्णमुपेक्षितकोङ्कणदेशो देशिकः मन्तार्य तरङ्गिणीं घटापहारिणीं स्नातृजनमलापहारिणीमासाद्य मलापहारिलहरीं दिशादशान्तविश्रान्तयशसं सम्प्राप्तातिविचित्रवचः-सिद्धिं निजवागनुवर्तिसमस्तार्थं महान्तं तं चिदम्बरमखीन्द्रमालक्ष्य तत्समर्पितविविधोपहारः समासासाद मरीचिनामकनगरम् ॥

तस्मान्मरीचिनगरादथ तत्र तास्कां
गत्वा पुरीं न्यवसदेकदिनं ततोऽयम् ।
सादारनाम पुरमाप ततो ययौ सः
श्रीमन्तराजनगरं बहुसौष्ठवाढ्यम् ॥ १४ ॥

सूर्यनारायणाभिख्ययज्वनो न्यवसद्गृहे ।
तत्राग्निहोत्रवीथिस्थे सोऽष्टरात्रं महात्मनः ॥ १५ ॥

तदानीं खलु तेषु सहागतेषु

यातावुभौ कोङ्कणदर्शनेच्छया
पूर्वागतो विप्रवरः स्विकां पुरीम् ।
यातो महानेष समं स वर्णिना
वैराग्ययुक्तेन पुनापुरेऽवसत् ॥ १६ ॥

तदनु पयःपारावारेणेव सितांशुसुधोज्ज्वलितेन, मन्दारपादपेनेव नन्दनालङ्कारेण, धम्पातीरेणेव मातङ्गधरेन्द्रभासुरेण, रङ्गविमानेनेव तुरङ्गराजराजमानेन, मेदिनीश्वरेणेव सदामित्रराजसंस्पर्धिना, पुरुहूतेनेव अनन्तामरलालितेन, त्रिदिवेनेव महारम्भोरुजारामरमण्युत्तमालङ्कृतेन, धनदालयेनेव विविधाक्षयकोशभासुरेण, यन्त्राकृष्टोदकशीतलसौधतलेन सद्मसहस्रेण समुद्भासमानां, कौस्तुभेनेव कलानिधिसन्तानसोदरेण, उत्तरदिगीशेनेव धनदेन, बलिचक्रवर्तिनेव काव्यगुरुणा, श्रीनाथेनेव कुमारसमानेन, अम्भोनिधिनेव सुशोभनक्रमकरेण, धन्यविशेषणेव सर्वतोभद्रेण, तरणिसारथिनेव अरुणांशुकेन, दुग्धाब्धिनेव सत्सन्तानसम्भवेन, पाकशासनेनेव विबुधाधिपेन, धीमन्थाचलमध्यमानचतुस्तन्त्रदुग्धाम्भोधिसमुद्भूतज्ञानामृततृप्तेन, सज्जनसङ्घातेन समधिष्ठितां, मदनेनेव रतिकान्तेन, मानससरसेव समहंसालङ्कारेण, वृत्तलक्षणेनेव चम्पकमालामञ्जुलेन, उपवनेनेव सदालिकुचदीपिता, रत्नसानुनेवोल्लसन्नकमेखलेन, पार्थेनेव प्रियार्थसम्पादनभासदंशुकमणिहारिणा, सरोरुहेणेव नतारकान्तसंराजितेन, किष्किन्धानगरेणेव तारापालकाननेन नगरमण्डनामण्डलेन परिमण्डितां, वनमालामिव नन्दनीयस्यन्दनोपेतां, सुपर्वनगरीमिव सुमनोऽलङ्कृतां, सत्कविराजिमिव मालङ्कारगोकुलां, युवतिमिव सुरतारम्भोचितां, मेदिनीन्द्रसंघट्टितपादपीठश्रीमन्तराजपरिपाल्यमानां पुनाभिधानां नगरीं तामवलोक्य समन्ततः प्रस्थाय ततः सन्तारितभीमापगः मुनिवरैरिवोपशमशीलैः, हरिचरणारविन्दगाथारसलोलैः, तुलसीनलिनोऽत्पलमालतीप्रभृतिसुमनःसमाराधितवासुदेवैः, मुनिमानससारसराजहंसस्य भक्तवात्सल्यातिशयगरिष्टकोपरि राजमानचरणारुणसारसस्य भगवतः सरसीरुहवासिनीकान्तस्य नितान्तं सेवारसभरितान्तःकरणैः धरणीगीर्वाणगणैः करणीकृतमाधिगत्य पत्तन पण्ढ्राभिधानमनुदिनमनवच्छिन्न

नैयमिकः सादरमाराधितः सज्जनैरनुसवनमासेवमानो भगवन्तं तं कमलाकान्तं मासमुवास सहर्षं स हि महानुभावः ॥

काञ्च्यां गौतमवंशवारिधिविधुः सत्सेवनीयो गुरुः
श्रीमान् सद्गुणवारिराशिरवसद् गोपालकृष्णाभिधः ।
सीतारामपदाम्बुजार्चनपरो बाल्येऽपि भक्त्यैकया
त्रय्यां तत्र चतुष्टये च निपुणो मन्त्रार्थपारङ्गतः ॥ १७ ॥

तदनु कदाचिज्जानकीजानिचरणनीरजपरिपूजननिरतः सेवितुमवगाहितुं च गङ्गादिमहासरितो मन्दिराणि नारायणस्य प्रस्थितः स काञ्च्या अनुमोदनाद्वरदराजस्य समगान्नगरीं गरीयसीं क्रमशः पुनाभिधानाम् ॥

अथागतं तं स निशाम्य मन्त्री
श्रीमन्तराजस्य महोपचारैः ।
आराध्य नारायणनामधेयो
गङ्गावगाहे धिषणां चकार ॥ १८ ॥

शताङ्गमातङ्गतुरङ्गपत्तिभि-
र्वृतः पुनापत्तनतोऽथ निर्ययौ ।
समं धरानिर्जररार्जिभिश्चनैः
सदेशिकः सैष गुणार्णसां निधिः ॥ १९ ॥

ततः पुरीं तामधिगत्य पण्डां
शिष्टांश्च मृष्टान्नघृतैः पयोभिः ।
विप्रान् स गोपालगुरुः सहस्रं
सम्भोजयामास सुधीः स एषः ॥ २० ॥

श्रीनारायणमन्त्रिणा सह गुरुर्गोपालकृष्णाभिधः
कृष्णं सेवितुमाययौ तदनु स श्रीविट्ठलाख्यं तदा ।
सीतारामगुरूत्तमेन बहुधा नत्यादिभिः पूजित-
स्तस्मिन् प्रीतिमसौ चकार कृपया श्रीरामभक्तोत्तमे ॥ २१ ॥

नारायणपदाम्भोजसेवकावपि तत्र तौ ।
नारायणाराध्यमानावूषतुर्दिवसत्रयम् ॥ २२ ॥

ततो ययौ पञ्चवटीं मदेशिको
गुरुः स नारायणमन्त्रिसंयुतः ।
सुरेशसिद्धेशनिषेवितां मदा
सपुण्यपृथ्वीरुहसंविराजिताम् ॥ २३ ॥

तत्रत्यमायामयहेमरङ्गु-
संशिक्षणस्थानविलोकनेन ।
संस्मारितश्रीरघुवर्यगाथ-
स्तन्मन्दिरं प्राप गुरुः सहार्यः ॥ २४ ॥

ब्रह्मप्रार्थनयार्यमान्वयभवं सीतासमेतं पितु
र्वार्तापालकमङ्गदाभयकरं लङ्केशमित्रेतरम् ।
रामं सोदरसंयुतं गुणनिधिं राज्याभिषिक्तं ततो
गोपालार्ययुतः प्रणम्य विविधैस्तुष्टाव सोऽस्मद्गुरुः ॥

उपदिदेश स रामषडक्षरीं
गुरुवरो गुणवारिनिधिस्तदा ।
निगमसारतमं च स मे गुरुः
सविनयं जगृहे महितो भृशम् ॥ २६ ॥

श्रीराममन्त्रान् स जपन् पठन् श्री-
वेदान्तसारं सह देशिकेन ।
गोदावरीतीर्थपवित्रिताङ्गः
तत्सन्निधौ पञ्चदिनान्युवास ॥ २७ ॥

सीतारामाभिधोऽस्माकमाचार्यस्तदनन्तरम् ।
तीर्त्वा नद्यद्रिदर्यादीन् रेवातीरं ययौ महान् ॥ २८ ॥

तदनु स गुरुः लोपामुद्रामिव सागस्त्यां, सुग्रीवसेनामिव दर्शितदशाननमदभङ्गां, जम्बूसरितामिवार्जुनोल्लसन्तीं, विकटकविवन्मर्दां, तरुणीमिव रमणीयवेणीं, मारुतचित्तवृत्तिमिव सदाराभोद्भासमानां, उद्यानभूमिमिव विलसद्द्विजां, स्नातृजनसन्दोहसर्वमङ्गलसञ्जनित्रीं वारं वारमवगाह्य रेवावारं सुमनःसङ्गमिव सप्रचेतसं, सरोवरमिव सत्कविराजमानं, राशिचक्रमिव बुधाधिष्ठितमाससाद भृगुवत्सं क्षेत्रम् ॥

ततो बिन्दुसरो गत्वा सरस्वत्याप्लुतं गुरुः ।
स्नात्वा नैयमिकं चक्रे कर्दमाश्रममण्डितम् ॥ २९ ॥

स ततः सिद्धनदीं प्रदक्षिणतः प्रासादवरसमुल्लसन्तीमासाद्य पुरीमवन्तीं कुचेलजालोलकुचेलाभ्यामानीतौ तदानयनप्रभावादुपरि संरुद्धानाशाखावलोक्य काष्ठसञ्चयौ भक्तिपारवश्यात्प्रणम्य पुनः पुनस्तद्गाथामधिगतमोदमपाठीत् ॥

तदनन्तरं रमणीयचर्यो दशिकोऽयं क्षिप्रं कृतक्षिप्रानद्यवगाहः पञ्चमद्वीपवत्सकौञ्चागेन्द्रां, कूलोभयजातभूरुहस्तबकमधुपानोन्मत्तमधुकरारावैर्गायन्तीमिव स्नातृजनान् सकलांहसः संरक्ष इति, गङ्गामिव सम्प्राप्तयमुनासङ्गमां चर्मण्वतीं तामवगाह्य नदीमनुष्ठितनिजनैष्ठिको न्यवात्सीत्तत्र ॥

प्रस्थाय तस्माद् गुरुसार्वभौम
आक्षीरसिन्धुमिवाम्मदायः ।
पुष्पोद्भवामाप सरस्वतीं तां
तस्मात् पयो यत्र भूधरेन्द्रः ॥ ३० ॥

अगाधधिषणस्तस्मादगात्प्रस्थाय सत्वरम् ।
अगादस्मद्गुरुः पुण्यं नारायणसरस्ततः ॥ ३१ ॥

अवगाह्य मुहुर्मुहुर्नारायणसरः विरचितनैयमिकः पङ्कजमिव हंसानन्दक्षमानश्च स्यमन्तपञ्चकमयमाचार्यः ॥

तत्र च देशिकोऽयं गाहमानजनमानसमलनिस्सारणपटु-तरोदकेषु नवस्वपि सरस्सु निमज्य पुनः स्नातुमिव सुन्दरीलपनमिव सत्तमालकान्तं नारायणमिव वनमालोल्लसितमासाद्य पुष्करं क्षेत्रं पङ्कजाक्षवक्षस्तट इव पद्मोद्भासितं, क्षीरसागर इव बहुक्षीरं, मानसोत्तररसाधर इव पुष्कररागभाजनं स्वात्मानं पुष्करिणीत्रयं हिरण्याक्षसंहारलीलाविहृतवराहं वराहं संमील्य भगवन्तमेवमस्तावीत् ॥

हिरण्यहारिणे वराहरूपधारिणे
नमो विहारिणे स्वभक्तचित्तमन्दिरे ।
स्वदंष्ट्रया धराधृते रमायुताय ते
तनूजगत्पूरणासमर्थशिल्पवैभवे ॥ ३२ ॥

स ततः सद्गुणराशिः
सकलजनानन्दवर्धकः प्रययौ ।
शङ्कप्रस्थं पश्यन्
मध्येमार्गं कुरुक्षेत्रम् ॥ ३३ ॥

तदनन्तरं दिशादक्षान्तव्याप्तदशो देशिकवर्योऽयं प्रस्थाय ततः प्रस्थात् खाण्डवपदपूर्वात् रामानुजार्यचित्तमिव यामुनतीर्थोल्लसमानं, नृपतिमिव नानावनोल्लसितं, रमापतिपदारविन्दमिव श्रीतुलसीसंराजितं, चन्द्रमसमिव सारङ्गसंयुतमागत्य वृन्दावनं क्षेत्रं लक्ष्मीलक्षितवक्षस्तटं, दिविषत्तटिनीपूरमिव पवित्रीकृतलोकत्रितयं, नटमिव गोगोपालरूपधरं, वार्दूलमिव विरचितवत्सवृषहयधेनुकसंहारं, वेदान्ताचार्यमिव उत्प्रेक्षितवादपं, अनन्तमिव नागकन्यास्तुतं, वपद्वारिदवृन्दमिव दावानलजनितभीतिनिवर्तकं, पाण्डुमिव कृतद्विजजायाभयं, शचीपतिमिव वैरचितवृद्धश्रवःपृथुमखनिषेधं, जनकराजानमिव जलेशवर्णितनानावेषगाथं, व्रजवल्लवीजनानुष्ठिततपःसाधं, भञ्जितार्जुनमपि रञ्जितार्जुनं, वैनतेयपरितोषायेव कृतकालीयभञ्जनं, नखशशिकलाविलसच्चरणारुणनीरजाभ्यां जितरम्भाकरभाभ्यामूरुभ्यां शिञ्जन्मेखलाष्टापदपटेन कटि-

तटेन श्रीवत्सोल्लसितवक्षःस्थलेन कौस्तुभभूषाभूषणकम्बुकण्ठेन साधु-जनाभिलषितार्थविश्राणनदक्षेण मन्दस्मितेन च सशुद्धासमानं भगवन्तं नन्दनन्दनमासेव्य रामानुजाचार्यवचांसीव यामुनतीर्थसंवर्धितानि तुळसीवनवृन्दान्यवलोक्य तेभ्यः स्म सविस्मयं नमस्करोत्येवम् ॥

यस्याः श्रीतुळसीमहीरुह इमे मूले मुनीशाः सदा
वर्तन्ते विटपेषु नाकपतयः पत्रेषु तीर्थानि च ।
मञ्जर्यां कमलोल्लसत्सुकुसुमेष्वप्यम्बुजाद्येषु यां
धत्ते श्रीहरिरादरेण सततं तस्यै तुळस्यै नमः ॥ ३४ ॥

काळीयसरसि स्नात्वा कृष्णक्रीडास्थळान्यथ ।
स संसेव्य गुरुर्भक्त्या मधुरां नगरीमगात् ॥ ३५ ॥

अथ खलु —

अस्मद्गुरुः सद्गुणवारिराशिः
कंसारिसेवोल्लसमानचेताः ।
मध्येपथं वीक्ष्य धराधरेशं
गोवर्धनं गोकुलमाससाद ॥ ३६ ॥

तत्राथ संसेव्य स नन्दनन्दनं
मानन्दमानन्दितमानसो गुरुः ।
पृष्टस्तदीयं चरितं महाजनै-
स्तुष्टः समूचे करुणार्णसां निधिः ॥ ३७ ॥

प्राप्तौ वैश्रवणात्मजौ सुरमुनेः शापाच्चिरं सालतां
तथ्यं तस्य वचः पुरा विरचयन् देवौ चकारेश्वरः ।
सर्वेषां फलदायकोऽहमिति यो लोकस्य सन्दर्शय-
न्निष्टेभ्यो बदरीफलानि समदात्तस्मै नमः स्तान्मम ॥ ३८ ॥

निर्जगाम स जवाद् व्रजादयं
मज्जनाय खलु सज्जनाग्रणीः ।
अञ्जराजतनयाजनिस्थले
तत्पयस्यखिलरञ्जनोत्सुकः ॥ ३९ ॥

सलिलमवजगाहे सैष पौषौरसेय-
मसि कमलकेळीकालसङ्क्रान्तनीलम् ।
सुरवरललनाश्रीगीत्युपाध्यायशिक्षा
इव समनुपठन्तः सन्ततं यत्र केकाः ॥ ४० ॥

ततो हरिद्वारमवाप सोऽयं
द्वारं हरेस्तत्रवसद्द्विजाग्र्यान् ।
उत्तारयन्नासददादरेण
गङ्गोत्तरीं तीर्थपदान्तरङ्गः ॥ ४१ ॥

अथ चायं चतुरानतश्चतुराननवत् सरस्वतीसङ्गतां, दुर्गामिव पञ्चास्यसन्धृतां, दितिमिवादित्यसुताश्लिष्टां, ज्योत्स्नामिव सागरानन्दिनीं, योगभिद्मुनिवृन्दवत् सकाशीभवदात्मस्वरूपां, नक्षत्रमालामिवाब्जोल्लसन्तीं, दिवगश्रियामिव [illegible]भिरामां, जम्बूसरितमिव गाङ्गेयप्रसुवं, भारतवर्षवत् प्रचक्काय-कोकनदां, गीर्वाणपुरपण्याङ्गनामिव मदा सुरतरूपशोभितां, आर्तव्रातकैतवाभिहूतस्वपारुषजह्नुमुनिकर्णशष्कुलीप्रवेशं परिसूचयन्तीमद्यतनानां निजतीरायतनानां शुद्धितरभगीरथकीर्त्यधिसम्पूर्णतया मुद्रितामिव स्फाटिकपेटिकामिवीक्ष्य तरङ्गिणीं गीर्वाणानामेवमवर्णयत् ॥

यदीयपानीयतरङ्गमाला-
संसक्तपीयूषगभस्तिबिम्बम् ।
ध्रुवं बतामंसत वाण्यभीक-
त्रिविक्रमाङ्घ्र्यार्पितसारसानि ॥ ४२ ॥

यत्क्षीरनीरन्ध्रनितान्तरिक्षत-
स्वच्छीभवद्भङ्गपरम्परासु ।
लसन्ति ताराप्रतिबिम्बकानि
मुक्ताभ्रमादीक्षत कोऽपि नूनम् ॥ ४३ ॥

यदापगागारचकोरशावाः
शैवालिभङ्गेषु सुधांशुबिम्बम्

खिद्यन्ति मुग्धाः प्रसमीक्ष्य नूनं
तमोनिगीर्णोऽयमिति स्म युद्धे ॥ ४४ ॥

यद्मिमालासु विलक्ष्यमाणो
नभोमणिर्म्लानकुशेशयानि ।
काले समाश्वासयितुं प्रियाणि
व्यराजत प्राप्त इव ध्रुवं हि ॥ ४५ ॥

मेयं हि गङ्गा विलसत्तरङ्गा
गाङ्गेयपङ्केरुहरागदङ्गा ।
विद्रावितस्नातृजनाघपूगा
सम्प्राप्तगोविन्दपदाब्जसङ्गा ॥ ४६ ॥

ततोऽयमनुज्ञाप्य [illegible]जपुङ्गवान् निमज्य तस्यां समकर्त्यु-न्मेषं तत्तीरराजमानपङ्कजतुलसीकुसुमादिभिरभ्यर्च्य भगवन्तं रामभद्रं सन्निधाने तस्य सपर्यायत सुरतटिनीमहिमावतरणकारणं श्रौवादिकं चित्रं चरित्रम् ॥

बदरीवनमाययौ ततो [illegible]या
नरनारायणसेवनान्मुकः ।
अवगाहितुमेव तत्र भान्तीं
निबुधानां तटिनीमटीक्षत ॥ ४७ ॥

विपश्चिकातापसमेव्यमानं
नारायणं चाथ नरं स्वनाथम् ।
नत्वा तपस्यन्तमयं महान्तं
नितान्तमानन्दितमानसोऽभूत् ॥ ४८ ॥

उवोख केदारमुदारचेता
मुदा स नारायणमादिदेवम् ।
नरं च संस्तूय विचित्रगीर्भि-
स्तं तत्प्रसादं समवाप्य मूर्ध्ना ॥ ४९ ॥

तत्र च विलसच्छ्रीवृक्षावलिमध्योल्लसितं, पारावारमिव पर्वतजातासङ्गकुतूहलं, पारायणमिव कृतसाधुजनावनं विरचितमनसिजविजयं च, भद्रसेनमिवारूढवृषभं भगवन्तं महादेवं सम्प्रणम्य स नितान्तमाससाद पुनर्हरिद्वारम् ॥

अथ यत्र देवतटिनीतटास्थितं
नगरात्रसत्रममवत् परीक्षितः ।
अयमेव केवलमयाच्छुकाश्रमं
न गुरुः शुकश्च समगादनीश्वरम् ॥ ५० ॥

धर्मात्मजस्य पुरदर्शनात्पठन्
हर्षी तदीयचरितान्यनन्यधीः ।
रम्यं पुरं न समगाद् गुरुः परं
रौक्माङ्गदं गुरुकरोऽप्यगात्तराम् ॥ ५१ ॥

आलोक्य तत् सद्गुणसागरो गुरुः
पाञ्चालिकाजन्मभुवं समागमम् ।
काम्पिल्यनाम्नीं नगरीं निसर्गतः
मध्येपथं प्राप ततः स गण्डकीम् ॥ ५२ ॥

तदनन्तरं गण्डकीमण्डने सालग्रामकुण्डे निमज्ज्य मुहुर्मुहुरार्षभभरतवत् त्रिषवणस्नानार्द्रकपिशजटाकलापः तत्रत्यभगवत्प्रतिमाः परिचर्याभिः अपरिमिताभिराराध्य समगात्यत भारतं चरितं यातश्च ततो हयग्रीवावतारस्थलम् ॥

संसेव्य देवं स तुरङ्गमास्यं
भक्त्यान्तरङ्गे च समाकलय्य ।
उदारसाहित्यकलाचकास-
त्तरङ्गिणीकामुकतामयाचीत् ॥ ५३ ॥

तदनु स गुरुरवगाह्य तटिनीं करतोयां तीर्त्वा बहुवासिन्धुरवासिन्धुरुद्वीक्ष्य चोटजमुदालकस्य कतिपयादिवसैरासाद्य मैथिलं देशं

तत्र च साश्चर्यं रामभद्रविनिर्भिन्नभवानीवल्लभमल्लासनखण्डावभिवीक्षमाणो निदानमपि तस्य संस्मरन् आनन्दरससान्द्रीकृतमानसः समाससाद मन्दिरं रघुनन्दनस्य ।

सीतारामगुरूच्चमस्तदनु तं संसेव्य सीतापतिं
यातो नैमिशकाननं मुनिगणैः सम्पूर्णमत्यद्भुतम् ।
तत्रत्यावनिनिर्जरानतपदः रात्रौ स तत्रानुगैः
श्रीमत्सप्तदिनाभ्वरं स्वकृतेरसीतेशभक्ताग्रणीः ॥ ५४ ॥

तदनु देवनदेन [illegible] मनोपेतामूर्जस्वतीमिव कविकान्तां सुग्रीवरोनीमिव कुमुदोद्भासकान्तिमवगाह्य सरयूसरितं भुवनत्रयमानमानदात्यशोराशिसरसाधिसम्राल्लोकत्रयाधिपत्यसीतापतिमणिपादुकाधिष्ठितमभितोऽवलोक्य नान्दिग्रामं सुरनगरीमिव रम्भाभिरामां कमलिनीमिव सराजहंसामयोध्यां नाम पुरीमासाद्य समारुरुक्षितः सज्जनैर्निशाम्य समन्ततस्तां ससन्तोषं समासेव्य भगवन्तं रामभद्रं विचित्रतरं तच्चरितमपाठीदेवम् ।

एनां पुरीमधिवसन्नवनीं समस्तां
राजा पुरा दशरथोऽतिरथः शशास ।
कामं स तन्त्रतटिनीपतिपारदृश्वा
कारुण्यभूः सुरपरेशनिषेविताङ्घ्रिः ॥ ५५ ॥

अस्य च पुत्रार्थिनोऽपि समतिक्रान्ते च शरदां षष्टिसहस्रे मृगीसम्भवः स मुनिपुङ्गवशृङ्गेणेवमङ्गजकामेष्टिमपि निर्वर्तयामास कृपया ॥

तदानीं तु वितानसम्भवेन तप्तकाञ्चनसप्रभेण प्राजापत्येन देवोत्तमेन दत्तं हृष्या परिगृह्य पायसं दिव्यं सरभसमादरेण रमणीभ्यः समदात् सैष दशरथः सतोषम् ॥

पायसामृतरसस्य तदानीं
प्राशनाद्दशरथप्रणयिन्यः ।
कोसलाधिपराजसुताद्या-
स्ता बभूवुरथ दौहृदवत्यः ॥ ५६ ॥

काले ततः प्रसुषुवे रघुनाथमेनं
सा कोसलेन्द्रतनया खमणौ प्रयाते ।
मेषाख्यराशिममरेशगुरौ सचन्द्रे
लग्ने शुभे कटकनाम्नि तिथौ नवम्याम् ॥ ५७ ॥

पुष्ये जजान भरतो महतां महिष्ठो
. रामानुजोऽजनि ततो भरतानुवर्ती ।
शत्रुघ्न एष च दिशादशराजमान
कीर्तिप्रभावमहिता अभवन् ततस्ते ॥ ५८ ॥

अथ कदाचित् तपःपावकच्छटाभिरिव जटाभिरभिमण्डितः, कविमिव भरताग्रजं, शशिनमिव लक्ष्मणानुगतं, विधिकलत्रमिव विबुधाभिवन्दितं, इन्द्रात्मजमिव जयन्तं, सुप्रभमिव गाङ्गेया-भरणशालिनं भगवन्तं रामभद्रं निखिलनिशाचरनिर्यापणपुरन्धरं मन्यमानोऽयं विश्वामित्रो निजमखविनाशकुलेचारिणं निशाचरमुपेत्य व्रजन् सलक्ष्मणं रामं ताटकाविजयाय बोधयामास ।

तदनु कृतान्तपुरि गन्तुमागतवतीमत्यन्तभीषणनिशाचरनिखिलप्राणपत्नजागरूकां प्रलयाग्निमिव दृष्ट्वा तत्प्रा-रुतान् तां यातयामासुः कृतान्तपुरिजनां मुनिरस्त्रमस्त्रसकलास्त्रज्ञस्य भगवतो रामचन्द्रस्य शरजालसङ्गः ॥

ततो निर्वर्तितमुन्यध्वरः स्वपादपङ्कजरजसा नारीकृतशिलातलः स हि दाशरथिरधिगत्य जनकराजपुरं निशाचरमुखानलवायसङ्गः कृतभूपमदभङ्गः सीतामुवाह सत्यवानिव सावित्रीम् ॥

तदैव तदनुजा भरतलक्ष्मणशत्रुघ्ना अपि माण्डव्यूर्मिला श्रुतकीर्तिरुदूढाः ॥

ततः कनकपीठोपरि राजमानः सीतासहितः स हि दाशरथि-रचञ्चलचञ्चलो मेरुसमारूढो जलद इव रेजे ॥

तदनु कतिपयदिवसेषु यातेषु—

सीतासमेतो विनतासुतध्वजो
नाथो रघूणां लसमानकौस्तुभः ।
तत्राद्भुजैर्मानवंशमौक्तिकं
स्वीयं पुरं गन्तुमियेष मैथिलात् ॥ ५९ ॥

प्रस्थाय ततो जनकराजपुरतस्तदनुज्ञातः —

मध्येपथं रघुपतिः स हि जामदग्न्यं
पृथ्वीशपाटनपटिष्ठपरश्वधं तम् ।
जित्वा प्रगृह्य वरकार्मुकमस्य धीरः
स्वीयं पुरं समगमत्सह बन्धुवर्गैः ॥ ६० ॥

तदनु सदारः स हि दाशरथिः सहितश्च तादृशैः सोदरैरुदारकर्ममिः मातङ्गशताङ्गतुरङ्गपादातव्रातसमुद्भासितां वलरिपुनीलोपलप्रमुखमणिसौधावलिसमुल्लसितां नानाविधवाद्यवादकगायकैर्मारुतकम्पितकैतवादपहसद्भिरिव सुपर्वनगराश्रियं 'एकः स्वादु न भुञ्जीत' इति वाक्यार्थनिर्णयेनाधिगतवैवाहिकभावुकभासुररामभद्रसन्दर्शनार्थमाकारयद्भिरिव च नाकाधिपान् कार्तस्वरकेतुदण्डसमुद्भासितैः पताकिकासङ्घातैरुद्वाहेनाप्यमुद्भासमानः सुसन्दर्शनसमुत्सुकाभिर्भामिनीभिरप्याराधयन्तीभिरारात्रिकाभिः प्रतिभवनमुल्लसन्तीं विविधविचित्रतरतोरणरमणीयां प्रादक्षिण्येन पुरीमयोध्यां प्रतिपदमाराध्यमानो मेदिनीनायकैस्तोष्टूयमानश्च पुराणवाणीपारायणनिपुणैर्धरणीगीर्वाणगणै रमणीयतमं सदनं निजमाससाद ॥

चामीकरस्फाटिकभित्तिसंयुतं
यद्विद्रुमस्तम्भसहस्रशोभितम् ।
लेखेशनीलाश्मकृताधिरोहणी-
राजत्खगेशोपलकुट्टिमोल्लसत् ॥ ६१ ॥

मुक्तामयैः पल्लवितैश्च तोरणै-
श्चित्रैर्विचित्रैर्मणिसौधपङ्क्तिभिः ।
अम्भोजराजत्सरसीसमुज्ज्वलै-
रुद्भासितं केलिवनैर्मनोहरैः ॥ ६२ ॥

माणिक्यदीपैर्वरकाञ्चनासनै-
र्दान्तैश्च मञ्चैर्वररत्नचित्रितैः ।
संराजितं यत्र सुपर्वपुङ्गवाः
संरेजिरे सौधनिवासिनो जनाः ॥ ६३ ॥

तस्मिन् (ग्र ? गृ)हे भूसुतया समेतः
सिंहासनस्थो रघुवीर एषः ।
रेजेऽनुजैः सादरमीड्यमान-
स्तपोधनाराधनजागरूकः ॥ ६४ ॥

अथ कदाचित्सोऽयं सीतापतिः, सदारान् सुतान् सादरमवलोकमानमनुरञ्जितजगत्त्रितयं निखिलभुवननायकमात्मानं निजभुवनमात्राधिपत्येऽभिषिषिक्षुं वृन्दारकसुन्दरीनन्दनीयसौन्दर्यकेकयनरेन्द्रनन्दनावरद्वयदामबद्धं दशरथमवलोक्य दयया मुमोचयिषुः सादरं धृतचीरवासाः सन्मित्रमयं ससौमित्रिः सकान्तः कान्तारराज्यं कतिपयकालमुररीकृत्य प्रस्थाय ततः साकेताद् अधिगत्य शृङ्गिबेरपुरं सदाशिव इव गुहोपचारितः तीर्त्वा च भागीरथीं, गत्वा च भरद्वाजाश्रमं, नत्वा च तं मुनिवरं कृतातिथ्यं यात्वा च विचित्रकटकं चित्रकूटं भगवता प्राचेतसमुनिना प्रतिदिनमाराधितः सादरं सदारसोदरः परिज्ञातस्वप्रयाणमवाप्तसन्तापमात्मनोऽटवीगमननिवर्तनाय समागतं सानुनयं कृतनैकावनतिं ससामाजिकजनजातं सानुजातं सम्यगुपस्थितस्वागतं परिपूर्णकृपावलोकैरवलोकितं तत्रत्यमुदन्तं निवेदयन्तं दृष्ट्वा तमनुजातं भरतं समाधाय विविधैरुपायैः साधयित्वा चात्मनो वनगमनं दत्त्वा च पादुकोभयं कृत्वा च प्रतिज्ञां जवादायास्यामीति यापयित्वा च कृच्छ्रतस्तं

स्थित्वा च तत्र कतिचिद्दिनानि प्रस्थाय ततश्चित्रकूटात् समगमदश्रमम-त्र्याश्रमम् ॥

रघुपतिः प्रियया सह सोऽगम-
त्तदनु सादरसोदरसंयुतः ।
दवममन्दसुपादपवारिता-
तपमतीव भयावहमद्भुतं ॥ ६५ ॥

सकलतापसमन्दिरसञ्चयै-
र्बहुतरं रमणीयममानुषम् ।
विलसितं सततं द्विजयुग्मकै-
र्हरिमुखैश्च मृगैरतिभीषणैः ॥ ६६ ॥

फलभरानमिताः पृथिवीरुहो
रघुपतेरिव सन्नतिसोद्यमाः ।
अभिविरेजुरिमे रणितद्विजा
घनितपाटलकोमलकुड्मलाः ॥ ६७ ॥

तदनन्तरं वन्दारुजनमन्दारो मेदिनीनन्दनानन्दनो नरदेवनन्दनः संहृत्य सापराधं विराधं, कृतपञ्चशरधरभङ्गं शरभङ्गं सुतीक्ष्णधिषणं सुतीक्ष्णं संयमीन्द्रसभामासमानं भगवन्तमभीकं लोपामुद्राभीकं नमस्कृत्य च तत्सम्प्राथेनतः यतिज्ञातनिशाटवधः द्विपश्चाननबान्धवान् क्रौञ्च-गणान् विरचयितुं सहितानहितान् पञ्चतया सुरतायाः पञ्चवटीकृत-निकेतनः लक्ष्मणेन विग्रीकारयन्नुग्रां रक्षोध्यक्षानुजां, समाहृ(तु ? त)मिव तदग्रजन्मानं पापजन्मानं पौलस्त्यजन्मानं त्रिशिरसमप्याशिरसं विर-चय्य, कृत्वा च खरतरं खरं खरशरविनिर्भिन्नं, रचयन् दूषणादीन् कृतान्तपट्टणाध्वनीनान्, मृगयाविहरन्महीनायक इव संहृतसुवर्णहरिणः, वणिगिव सीतावियोगकर्शितमनाः, संहृतकबन्धोऽपि सम्प्राप्तकीर्तिरयशाः शनैः शनैराससाद शबर्याश्रमम् ।

तदनु समनुगृह्य शबरीं चिरसञ्चितबदरीप्रमुखफलादनतो दत्त्वा च तस्यै निजपदं मेदिनीनन्दनाविरहजातज्वरोऽनुयाय्यनुजो जगती-पतिर्यातुमियेष (सतां ?) सतांपतिः पम्पाम् ।

करोति प्रातिलोम्येन स्वनाम्ना पापमेव या ।
पम्पां स रामस्तां रामातापतप्तः समागमत् ॥ ६८ ॥

तदानीं खल्वाहवलालसरसापरिपाल्यक इव समनुगृहीताशुगभूः, देवकीतनयशताङ्क इव सम्प्राप्तसुग्रीवानुबन्धः, रविरिव सङ्कुचिततारेशप्रकाशः, महाबलिरिव दिशादशनियोपितहरिसैन्यः, भगीरथेनेव समुत्तीर्णसागरेण समासादितश्रीसीतामूर्मिकासमर्पणाद्रामस्य, विषमपथेनेव क्षपिताक्षरथेन प्रहस्तादीन् हतवता विहस्तादीन् विरुतमात्रविन्नासितरात्रिञ्चररात्रेन लङ्कापुरपतिनिबन्धेन चिरोषितनिजतातसखस्य निनीषुणेव पारणामपुरानुभूतां सवर्ष्मं समारुक्षुणेव दिवं दीक्षितेन लङ्कापुरकमनीयकङ्कचयननिजसमर्पितानापशुवपासमोस्वादनतः प्रजातजातवेदःपरितोषणप्रवीणेन समुपक्रान्तकृत्यन्तरपरित्यक्तपिशिताशपशुवपाश्रपणसमापतितसुकृतेतरपरिहृतय इव सारंसारं रामरामेति संमीरयता निजदासवरेण समीरसुतेन निवेदितसकलसीताकुशलोदन्तस्तदानीतावदातानिजवानितोत्तंससन्दर्शनसमुद्भूतमोदस्तदैव पत्नीकृतमातरिश्वतनयः, वासुदेव इव सशुग्रीवाङ्कुरः, अभिनवप्रासाद इव प्रोल्लसद्ध्वजाक्षः, हिमानीधरगुहान्त इव हर्यक्षरक्षितपुरःप्रदेशः, निशानाथ इव लक्ष्मणानुगतकान्तवपुः कुमुदामोदकरश्च, धर्मात्मज इव सदा ससमीरणात्मजः आश्रितजनसन्तापदावपावकशमनपाथःप्रदः दशशताङ्गदायादो निजपूर्वजस्यनिर्मितामिक्ष्वाकुमुद्रामिवावर्तपङ्क्तिं समादधतः समुपाविशदम्भोनिधेस्तीरे सहसोत्तर ॥

तदनन्तरं तिरस्कृतविभीषणगर्वस्त्रियानिकेतमतास्तिरस्कृत्य तमग्रतोजातमनन्यशरणं शरणीकृतनिजचरणं सज्जनावलितोषणं रमणीयगुणभूषणं रिपुजनभीषणं विभीषणं विधाय च लङ्कापुराच्चञ्चलाधिराजं स्वकटाक्षमात्रसंशिक्षितशिलीमुखवाध्यवस्तद्रोषविषयीकृतशरणागतवरुणालयनिर्दिश्यमानद्रुमकुल्यदेशीयः विभीषणनिर्वर्ण्यमानलङ्कापुरपन्थाः क्रमेण सेतुं विधाय नलेन मार्गेण इव दक्षिणाशाभिमुखः दशमुखप्रमुखलेखारीन् पत्तनं निनीषुर्वैकर्तनस्य वैकर्तनकुलजलधिकलानिधिरासासाद लङ्कामलङ्कारवतीम् ॥

तदनु सानुजो जानकीजानिः हुर्वन् सुरान्तकनरान्तकावन्तकान्तिकौ, विध्वंसयन् कुम्भनिकुम्भौ, विरचयन् दुर्मुखं विमुखमतिकायमपि विकाययन्, अकम्पनं च कम्पयन्, विरूपयन्विरूपाक्षयूपाक्षौ हत्वा च कुम्भकर्णादीन् जित्वा च मेघवाहजितं मेघनादं दशकण्ठकण्ठोद्दलनाय समाहितो बभूव ॥

तदानीं खलु—

अमर्त्यराजस्तरसा स्वदूतं
समादिशद्दाशरथेः समीपम् ।
शताङ्गमेतच्छतवाजिनद्धं
नयेति युद्धे पदचारिणोऽस्य ॥ ६९ ॥

तदनु सविनयं निवेदितमेतच्छताङ्गं तुङ्गतुरङ्गमानीय मातलिना समधिरुह्य धराधरवरधीरो धराभृधवः स्वकलत्रापहर्त्रा रात्रिञ्चरनेत्रा समायोध्य समं द्वन्द्वेन वैनतेयेन वातन्धयं, सौरेण तामिस्रं, पाशुपतेन दैतेयं, पार्जन्येन जातवेदसं, वैष्णवेन माहेश्वरं चाग्नेयास्त्रेण भिन्दन् सप्तदिनान्यसमाप्तशस्त्राहवाग्रहः शिताग्रसुधामयूखशिलीमुखमुखविखण्डिततुण्डावलोकनात् त्रपन्तं तं जगत्त्रितयामित्रेतरं पौलस्त्यभिन्नं कमपि कपिमण्डलीखण्डनं दशतुण्डमेनं समाश्वासयितुमिव सौमित्रिसायकसमवाप्ततोदनं नन्दनीयनिजनन्दनं नन्दनेशजितं तदीयपदवीं निनाय तमनयं न्यायतः पितामहास्त्रतः ॥

अथ खलु स एष दशरथिरभिवृष्टः सुमनोभिः सुमनोभिर्विरचय्य विभीषणं लङ्कापुरेशं परिगृह्य रामां विनयाभिरामां सकलकल्याणगुणार्णसां निधी रामचन्द्रः समारूढवानरर्क्षरक्षोगणं सरोवरमिव लक्ष्मणाभिरा(मां?मं) विधिमिव हंसयानमधिरुह्य विमानं पुष्पकं नाम समवलोक्य समन्तात् लङ्कापुरमधि भूमिसमुद्भवे! विभीषणभवनामिदं जितरम्भोरु! सेतुसमारम्भणस्थलमिदं जितपङ्कजपादे! पम्पासर इदं जनकनन्दिनि! जनस्थानमिदं कुम्भिकुम्भस्तनि! कुम्भसम्भवायतनमिदं विधुमुखि! विराधविध्वंसनधरित्रीयमिति च विविधाः कथाः कथयन्नाससाद नन्दिग्रामं पुरतः समागतभरतायोध्यकसहितः ॥

तदानीं खलु स्वपादसारससमासेवननिरतं भरतमर्थिसार्थप्रार्थितार्थसमर्थनसमर्थतमपाणिपाथोभवसमुत्थापितं संप्रालिङ्ग्य सुचिरमवाप्तसर्वार्थः मरालविरळेतरपार्श्वयुगलपर्जन्य इव वालव्यजनसंवीज्यमानः चिरतरपरिचयतः समनुभवेयं रामाननेनोपमानमादमिति सततसेवमानेनेव वनितायुतेन तारकापतिना तारराजितसितातपत्रेण संशोभमानः सानुग्रहमवलोकयन् रक्षःप्लवगऋक्षाधिपतीन् अरुणतानुबन्धतो विनतात्मजाय तरणिरथसारथ्यश्रमविश्रान्तिविश्राणनायेव तदीयतुङ्गतरतुरङ्गमान् सञ्चोदयन्तीभिः निजाञ्चलैर्विचित्राभिरपि सचित्राभिः पताकिकाभिः प्रतिभवनमुद्भासमानां, तारागणैरिव लसमानहस्तश्रवणैरिन्दिराव्यापारैरिव दानवारिमनोहरैर्मातङ्गैरुल्लसन्तीं सागरैरिव सावर्तैः शुक्तियुक्तैश्च कुम्भकारभवनैरिव भासमानभाण्डैः सन्तानादिभिरिव सिन्धुसम्भवैस्तुरङ्गैः समुद्भासमानां, महाह्रदैरिवावदाततरवारिभिः सत्कविकाव्यप्रबन्धैरिव बाणसंगणिमाश्रितैः भानुष्कधुर्यवत् घणघणायमानकोदण्डैः सार्वभौमभवनैरिव सदारामाश्रयैः, बलिश्वरणैरिव विलसद्वारवाणैः पादातवरीणैरतिरमणीयां प्रविश्य पुरीमयोध्यां तत्र तत्र परिपूजितः सज्जनैः निर्जरेश इव निजनगरीं सदनं निजमाससाद मैथिलीतनयासहितः स हि दाशरथिः ॥

स दारपरिमोदाय निजागमनमङ्गलम् ।
श्वश्रूनिवेदनायेव ववन्दे प्रसुवं तदा ॥ ७० ॥

तदनन्तरं वसिष्ठप्रमुखाः परमर्षयः भगवतः सीतापतेर्भविष्यत्यद्य सार्वभौमाभिषेक इति सहर्षेषु सर्ववर्षपुरुषेषु, वर्षत्सु पुष्पवर्षममरवर्येषु, गायत्सु सुतरां सुरगायकेषु, नृत्यन्तीषु च सुरवरपुरपुरन्ध्रीषु, सुरनरवरताड्यमानभेरीतूर्यानकदुन्दुभिवीणावेणुपणवपटहमृदङ्गझल्लगोमुखप्रमुखवाद्यध्वनिप्रध्वानितेषु दशदिशान्तेषु बहुतररत्नपरिचित्रितपञ्चाननासनसमारूढं समभ्यषिञ्चन् प्लवगपरिवृढसमानीतसरितांपतिसलिलैः सीतासमेतं रामचन्द्रं त्रिजगत्यधिपं वसुमत्याधिपत्ये ॥

तदा खलु शतमखमुखा लेखेश्वराः पद्मरागगारुत्मतमारतकेन्द्रनीलमहानीलवैडूर्यविद्रुममौक्तिकप्रमुखरत्नावलिचकासत्काञ्चनकाञ्चीमकुट

कटककुण्डलादिविविधभूषणवरपरिमण्डितं तं पुण्डरीकाक्षमभ्यभूषयंश्च भूषणवरैः पुनरप्यनुरागतो रघुवीरम् ॥

मेखलालपनभासुरतारा
रेजिरे रघुपतेरुदरस्थाः ।
निर्गता अनवकाशतयान्त-
र्ब्रह्मण्डपोतनिचया इव तस्य ॥ ७१ ॥

तदनन्तरं कलानिधानिव कुवलयोल्लासके, विन्ध्यमहीध्र इव राजहंससंसेव्यमाने, नन्दनन्दन इव सुकृतसन्धृतगोत्रे, रत्नाकर इव वाहिनीशे, त्रिदशेन्द्र इव सन्नन्दने, वासिष्ठ इव धरानन्दनेशनन्दनीयगुणे, दिनमणितनयान्वयदुग्धाम्बुधिसुधादीधितौ धरणीतनयारमणे भगवति रघुवीरे नितरामनुशासति वसुधामाचण्डदीधितिकरप्रवेशं सुकृत-निरतेषु च जगतीजनेषु, निस्तापत्रये च जगत्त्रितये, निष्कृतौ च कृतान्ते, ससुमफलेषु च रसोद्भवेषु, निर्मलपूरभरितासु च सरित्सु, सुप्रजस्सु च सकलासु प्रजासु सम्प्राप्तसकलकामेषु च लोकेषु, कुटिलता कुन्तलेषु, दण्डः छत्रेषु, अरियोगः स्यन्दन्मकरन्दारविन्देषु, अङ्गरहितता रतिकान्ते, सरोगता सारसेषु, स्नेहहानिः प्राक्तनपिण्याक-पिण्डेषु, अशरणता रावणस्य, अशोकनाशः पिशिताशपुरे, विग्रह-प्रयोगः काव्यपाठे, अपार्थता वार्तराष्ट्रेषु, शल्यभेदनं कुरुक्षेत्रे, चाप-त्यागो मकरारुरुक्षुमार्तण्डस्य न क्षत्रजनस्य, मुकुलीभावः कुड्मलेषु कुवलयासन्तोषः प्रभाकरप्रकाशे, सत्त्वभवारणबन्धनमनन्तेशनिशान्ते, चण्डकरत्वं मानुमालिनि, शरभेदो वप्रेषु, मन्दानुरागः छायाप्रिये, मार्गणसञ्चारो रणेषु न जनपदेषु, राजपीडनं पङ्कजाध्वरेषु न जनेष्विति परमेवं व्यवस्थितम् ॥

रघुवरचित्रचरित्रं देशिकवर्यः स वर्णयन्नेवम् ।
तच्छ्रुतिजातामोदैः सज्जनजातैः समीडितो बासीत् ॥ ७२ ॥

इति सीतारामसूरिविरचिते कविमनोरञ्जके
द्वितीयोल्लासः ॥

अथ तृतीयोल्लासः ।

स्तुत्वा ततो रघुपतिं निजवाग्विलासै
रुद्भासमानमहिमं बहुळप्रमोदः ।
वैकर्तनान्वयपयोनिधिपूर्णचन्द्रं
प्रायादजामिलजनिक्षितिमार्य एषः ॥ १ ॥

अजामिलमुनेर्गाथामगायत शुकेरिताम् ।
कमलाकमितुर्नाम्नां सोऽयं माहात्म्यसूचिकाम् ॥ २ ॥

इत्थमत्यर्थं सम्भावयमानो रामभद्रनामवैभवं समभिययौ ब्रह्मावर्ताभिधानं क्षेत्रं यत्र च ऋषभः सत्रमचीकरत् ॥

शृङ्गिबेरपुरं तस्मात्सोऽयमस्मद्गुरुर्महान् ।
गाम्भीर्येऽम्भोनिधिसमः समगात्सज्जनाग्रणीः ॥ ३ ॥

ततः खलु कृष्णमिव कालिन्दीसहितं, धातारमिव सरस्वतीसमुद्भासितं, गुहमिव बर्हिर्मुखवाहिनीसङ्गतं, अश्वमेधमिव प्रयागं समधिगत्य तं क्षेत्रवरं त्रिवेणीसङ्गमसवनत्रयावगाहनकपिशीकृतवेणीकलापः सोऽयमनवीनकलाकलापो मासमुवास सहस्यम् । तदनु समगाद्विचित्रकटकं चित्रकूटम् ॥

देशिकस्तत्र संसेव्य समीरणसुतं मुदा ।
यादसांपतिदायादमद्राक्षीत्तापसेश्वरम् ॥ ४ ॥

काशीमवाप गुरुरेष गुणैकराशि-
स्तस्माद्विचित्रकटकादथ चित्रकूटात् ।
भागीरथी हरिपदाम्बुजसङ्गपूता
पूतीकृतत्रिभुवना प्रचकास्ति यस्याम् ॥ ५ ॥

पावमानिपुरोभागे भासमानां शुभावहाम् ।
भागीरथीमभिययावथायमवगाहितुम् ॥ ६ ॥

'तदा खलु देशिकोऽयं समवगाह्य मुहुर्मुहुर्वाहिनीं वर्हिर्मुखाणां समाराध्य तं भगवन्तं धरणीतनयारमणं, चन्द्रमसमिव सोमं मण्डलेशमिव महासेनालङ्कृतपार्श्वभागं भोगाङ्कितं च, उग्रमप्यनुग्रं प्रागुत्तरदिङ्मात्रनाथमपि विश्वनाथं स्वयमुपनताणिमादिमनिखिलैश्वर्यसनाथं नाथमानजनमनोरथपरिपालनदक्षं दक्षाध्वरविध्वंसिनं सह निजपरिषदैः समीरयन्तं राम रामेति निरन्तरं तं भगवन्तं सदाशिवं शिवं प्रदक्षिणीकृत्य नमस्कृत्य समस्तावीत् ॥

तदनन्तरम् —

यद्गोपुराग्रप्रतिमा लसन्त्यो
वराणसीश्रस्य विलोकनाय ।
समागता विश्रमितुं निषण्णा
मध्येपथं स्वर्गिवरा इवासन् ॥ ७ ॥

यत्सौधकूटालयसालभञ्जिका
गीर्वाणराड्लोकजिगीषयानया ।
सञ्चोदिता यान्त्य उपर्युपर्यलं
राजन्ति सेना इव शस्त्रपाणयः ॥ ८ ॥

यच्चन्द्रशालालयसालभञ्जिका-
श्चन्द्राश्मभृङ्गारकरा विरेजिरे ।
सम्पाद्य चन्द्रादमृतं प्रदित्सवो
वाराणसीवासिजनेभ्य आदरात् ॥ ९ ॥

वाजिनीलमणिसौधसङ्कुलं
व्योम वीक्ष्य नवनीरदावृतम् ।
मानुतापपरितप्तचातका
मेजिरे मुदमतीव यत्पुरि ॥ १० ॥

पण्यवीथिषु घरट्टजं रवं
सर्वतः प्रसृमरं मनोहरम् ।
नीलकण्ठनिवहा निशम्य ते
लेभिरेऽभ्रवशङ्कया मुदम् ॥ ११ ॥

घटीवधूट्यः खलु यत्र पुर्यां
भुजावबन्धेन निपीडयन्ति ।
शतप्तगाङ्गेयघटं कुचानां
विजेतुकामा रिपुशङ्कयेव ॥ १२ ॥

विश्वेशसेवासमये परस्परं
सङ्घर्षजस्वेदपयःपरम्पराम् ।
प्रापुस्तरां साधनतां व्यपोहितुं
यस्यां पताकास्त्रिदिवौकसामपि ॥ १३ ॥

वरणतरणिराजत्पुत्रिका नाविकेन्द्रा
गृहगणसरिदीशे सन्तरन्तीव यस्याम् ।
विमलकनककेतुक्षेपणीभिर्धृताभिः
सुकृतशुभसमीरे सौधकल्लोलजाले ॥ १४ ॥

वाराणसीं तां नगरीं समन्तात्
समीक्ष्य तस्यां गुरुसार्वभौमः ।
मासानवात्सीन्नवकं समोदं
सभीरसूनोः सविधे महात्मा ॥ १५ ॥

ततः परं पङ्कजाक्षपदाम्बुजपरिपूजनजातामोदो देशिकोऽयमसंस्पृश्य सिन्धुं सुकृतक्षपणामवगाह्य शोणभद्राभिधानां धुनीमिभिययौ गयाभिधानं क्षेत्रम् ॥

अथ खल्वभिषिच्य पदं विष्णोः आभिषेचनिकैः कलशैरभ्यर्च्य तुलसीकुसुमादिभिः कुम्भसम्भवभाषितसंहृतब्रह्माण्डभेदनसम्भृतसम्भ्रमकूटसहस्रं सृङ्गिवेरपुरमिव गुहाभिरामं कैलासमिव शिवायतनं, बर्हिर्मुखलोकमिव हरिहयकान्तं, (पु? पौ)लस्त्यमिव रञ्जितार्जुनं, मनुवंशमिवेक्ष्वाकुकमनीयं, सभाश्रितपिशिताशपुरकान्तारारामभद्रदारैरिव कुवेणीरमणीयैर्जलाशयैः सगुल्माशितं, अकुलीनमपि सद्वंशसम्भूतिं,

भीममपि कीचकोल्लासकं, सरोवरमिव राजत्पुण्डरीकं समतीत्य विन्ध्यं धरमवलोकितवङ्गदेशो देशिकः पुरुषोत्तमसिसोविशुराजगाम जगन्नाथम् ॥

इहामनन्तीति गतस्य देहिनः
करस्थिता मुक्तिरनन्तशायिने ।
निवेदितात्मादिलवाशनं बुधा
जनार्जितैनःकुलतूलपावकम् ॥ १६ ॥

तं मुदा देशिकोऽस्माकं ववन्दे पुरुषोत्तमम् ।
दारुसञ्जिहितं देवं सुभद्रासीरिसंयुतम् ॥ १७ ॥

तुष्टाव सन्तुष्टमनस्क एष
इष्टार्थसिद्धयै मुनिभिः समिष्टम् ।
क्लिष्टं पिनष्टि स्थिरमाश्रितानां
यस्तं निजेष्टं ददतं सुहृष्टम् ॥ १८ ॥

योऽन्तः प्रविष्टो जगदिन्द्रियाणि
वागादिकान्येष दयार्द्रदृष्ट्या ।
सञ्जीवयत्यद्भुतविक्रमस्य
गातुं क ईष्टेऽस्य गुणाननन्तान् ॥ १९ ॥

तदेतन्महसां वृन्दं प्रमोदं प्रददातु मे ।
उदारचरितस्यास्य सेवालालसचेतसे ॥ २० ॥

तदनन्तरं पतितपावनो गुरुः
स रथाङ्गमद्भुततमं तथाभिधम् ।
अभिवन्द्य तां विपणिवर्यशोभितां
नगरीं समीक्ष्य परितस्तसो ययौ ॥ २१ ॥

तदानीं खलु मेदिनीत्रिदशवन्दितपादारविन्दो देशिकोऽस्माकं मुकुलीभवदम्भोभवमध्यबद्धचरणेषु षट्चरणेषु, सदनसमुत्कण्ठेषु कल-

कण्ठेषु, कुमुदामोदनकिरणास्वादनाय सानन्देषु चातकवृन्देषु, अन्धकारबन्धनसमुत्सुककृष्णवर्त्मप्रविष्टपुष्करेष्टभानुष्विव विष्फुरत्सु दीपाङ्कुरेषु, महानन्देषु च कुमुदसन्दोहेषु, नन्दनवनेष्विव सञ्चरत्कौशिकेषु, दिक्चक्रेषु बहिर्मुखबल इव विहिततारकाप्रकाशे सन्ध्यासमये सप्ताविव सोच्चश्रवणे गगने सायन्तनसमयसमुदयसञ्चलितपात्रिदोषपरिहाराय सिन्धुनेव समाबद्धेन मणिना कुक्षिलक्ष्यमाणजक्षितक्षणदान्धकारेण प्रोद्भासमाने, त्रिकगत्पङ्केरुह इव सुरवर्त्मवाङ्कुरस्य, स्फाटिकदर्पण इव दम्पतीजनलावण्यदर्शनस्य, फेनसन्दोह इव क्षणदाकलिन्दनन्दिन्याः, नन्दनीयतिलक इव पुरन्दरदिशासुन्दरीवदनारविन्दस्य, भारद्वाज इव कलशोद्भवे सार्वभौम इव मानमानकरभकरे मनोभूसार्वभौममहाभिषेकमणिपीठाकृतौ मन्दमन्दमनुविन्दति कुमुदबन्धावुदयमविन्दताय-मान्ध्रदेशम् ॥

सुधादीधितिपादानां तदा सङ्गेन पुष्करम् ।
चकासितमभूदेतच्चित्रं धात्र्यां विजृम्भते ॥ २२ ॥

करैः समालिङ्ग्य सरोजिनीं मां
भजोते राज्ञा परिसान्त्वितापि ।
सतीमणीनां चरितं जनानां
प्रदर्शयन्ती मुकुळा बभूव ॥ २३ ॥

कुमुदं मुमुदे तदा विधोः
करसङ्गकुतूहलाद्यथा ।
प्रमदा पतिदेवता भृशं
चिरसङ्गतकान्तसङ्गमे ॥ २४ ॥

अहो खल्वेतद्देशीयजनस्य भाग्यवत्ता ।

यासां चाधरबिम्ब एव मधुरं पीयूषमास्ते मृषा
दुग्धाब्धाविति विश्ववाक्यममृतांशुश्चापि वक्त्रैर्जितः ।
जाताजातसुरोमराजिसहिताः कुम्भीन्द्रकुम्भस्तनी
रामा नायकसेवनैकनिरताः सम्प्राप्य राजन्त्यमी ॥ २५ ॥

तदनन्तरं कमलापतिकृपया संसारकाननवदनायासादगणित-मृगखगगणाकीर्णानि धरणीधरकटकाश्रमाणि केलीलालसारसकुल-धवलच्छदनिलयायितकमलानि विमलानि अनिलचालितनीलोत्पल-कुलानि कूलविलसितघनशालिघनाल्लवविपुलफलालसमालतीमुखल-तासंवेष्टितनगमालोल्लसितान्यतिक्रम्य च तटिनीतटाकादीनि सानुगः समवलोकितमृगराजगिरिः समाजगाम सप्तगोदावरं स हि महा-नुभावः ॥

ततः स्थित्वा दिनानि सप्त कृत्वा त्रिषवणं तत्र कृताह्निकः समधिगत्य रामभद्रालयं भद्राचलं भक्तवत्सलं सानुजं जानकीजानिं सम्प्रणम्य पुनः पुनः सप्रदक्षिणं नत्वा स तत्र कतिचिद्दिनानि बल-मिव सङ्कर्षणं युधिष्ठिरमिव भीमसेनभासितं कैलासमिव सत्र्यम्बक-मान्ध्रदेशमतिक्रम्य मनुसन्तानमिव सगरसिंहं काश्यपस्मृतिमिव प्रह्ला-दोत्पादकं गन्धर्वकुलमिव कलकण्ठोल्लसितं, मानससर इव सराज-हंसं द्रामिडाचार्यमिव वकुलभूषणं गोपालसङ्घमिव वृषभावभासितं आश्रितजनमङ्गलदं मङ्गलगिरिमासाद्य सगर्व्यायेव कृपया भक्ताय सामिविभक्तपानकधनं हिरण्यहारिणमपि महानुभावं संसेव्य नर-सिंहं संस्तूय विविधैः स्तवैः सप्रदक्षिणं सम्प्रणम्य पानकतुलसीकुसु-मादिभिः समादाय शिरसा सादरं तत्प्रसादमवगाह्य जाम्बूनदवदनां नदीं तदनु समगात् श्यामवारणधरणीधरं धरकन्यारमणसिसेविषया ॥

तदनु देशिकोऽयमुदारचरितो मुदा परमया वन्दारुवृन्दमन्दा-रमिन्दिरारमणपादारविन्दगाथामरन्दसमास्वादनसन्धृतपरमानन्दमभि-वन्द्य देवदेवं महादेवं दर्भशयनप्रदेशमिव चिरन्तनकुञ्जराश्रमसम-लङ्कृतं, द्वारकापुरमिव, मन्मथोद्भासितमरविन्दबन्धुमिव सप्तपत्र-स्यन्दनोपेतं, दक्षिणपारावारमिव सेतुविराजितं, सुधर्मसभान्तरमिव सदेववल्लभं, नन्दनवनमिव कुसुमितपारिजातकं, हिमानीमहीधरकटक-मिव भासमानवानप्रस्थं, अनन्तेशनिशान्तमिव तुङ्गतरमातङ्गं, त्रिदिवमिव दिवौकस्समुदायसमेतं, शनैश्चरमिव छायानन्दनं, क्रतुसङ्घातमिव सर्वतो-मुखसमुद्भासितं, कैलासमिव शङ्करप्रियभासमानं, प्रावृट्समयमिव साम्र-

पुष्पं जीमूताविर्भावकारणं च, इन्द्राणीपर्यङ्कमिव कौशिककल्पनीयं, नासुदेवमिव रञ्जितमार्जुनं, बन्धविशेषमिव सर्वतोभद्रं, सुरेशनिशान्तमिव ऐरावतोल्लसन्तं, सत्यवन्तमिव गायत्रीकान्तं, दुग्धाम्भोधिमिवामृतोद्भवं, कामुकसङ्गोत्सुकितकामिनीसमाजमिवाभिनवमालिकाभासमानं, पश्चिमोत्तरहरि(ता ? द)न्तरमिव समीरणरमणीयं, दाशरथिमिव वैदेहीविलासमोदं, भीमसेनमिवाधिगतबहुनागबलं, नृपतिमभान्तरमिव नटीलसमानं, नीलाम्बुजमिव चक्रमर्दकाह्लादकं, सनन्मकरन्दारविन्दमिव नन्दनीयभृङ्गराजं, अलकापुरमिव सौगन्धिककमनीयं, स्कन्दमिव वल्लीविलसितं कलोदयमदगन्धिप्रान्तमिव पापतिनाङ्गशालिनं, प्रत्यक्पारावारमिव कुक्षरालीसङ्कुलमिनं, माङ्गल्यधरणीधरमिव साकाशगङ्गं, तदुदग्रराजमानपरंज्योतिस्सिलेखया समासक्तात् समीरणजठरंभरिपरिपालकधरणीधरवरीणम् ॥

अस्मद्देशिकदर्शनार्थमवनौ तं मार्गमाणश्चिरं
प्राप्तं पङ्कजवासिनीसहचरं द्रष्टुं तदीयं घरम् ।
श्रुत्वा रम्यतदद्रिपादपवरानाकर्ण्य वल्लीपथे.
रेजे तस्य दिदृक्षया ऋतुमिषान्नूनं वसन्तस्तदा ॥ २६ ॥

तदानीं तु —

शृङ्गारराज्ये स्वसखं वसन्तः
स्वान्ते वसन्तं स विभावयन्तम् ।
मरन्दनिष्यन्दतरङ्गिणीना-
मम्भोभिरेतं सुगनोत्तरीणः ॥ २७ ॥

मदनाय तदा मुदा बहुः
प्रमदाः प्रमदावहे उभे ।
शितसायकयुग्मयोजिते
धनुषी रुचिरे जयप्रदे ॥ २८ ॥

अनिर्गलविकर्षणाद्गुणघर्षणायासतो रणे
षडङ्घ्रिविलासदुद्गुणं पटुमुपाजहाराद्भुतम् ।

वियोगिजनचेतसां विदलने स्मरक्ष्माभृते
सरोरुहशिलीमुखप्राथितमम्बुजिन्यादरात् ॥ २९ ॥

प्रमदाः प्रमोदभरतो
मनसिजराजे पुनस्तूणे ।
प्रददुर्प्रावरीणौ
वियोगिचेतोविदारणे निपुणौ ॥ ३० ॥

तद(त)नुसमरोपयोगिनीभिः
परिवृत एष तदा स्वनीकिनीभिः ।
त्रिभुवनविजयाय चित्तजन्मा
पवनशताङ्गमधिष्ठितः प्रतस्थे ॥ ३१ ॥

क्वचित्क्वचिन्मलयसमीरकैतवा-
द्वियोगिनां मनसि विषोल्बणानिलम् ।
अणूदरीनयनमरीचिकञ्चुको
विसृज्य तत्पथि विचचार वीतभीः ॥ ३२ ॥

सांयुगीनजनताग्रणीरयं
वल्लकीगणमणूदरीमयम् ।
नादयन् विरहिमानसं जवा-
दाचकर्ष मदनः स लीलया ॥ ३३ ॥

मधुव्रतवरूथिनीरणितवारिजातारवै-
र्मरालवरटाशुकस्वनविपञ्चिकानिक्वणैः ।
नदीनदसरोवरोल्लसितभङ्गपारम्परी-
ध्वनत्पटहडिण्डिमध्वनिभिरायया तं स्मरः ॥ ३४ ॥

सारसोल्लसितसारसवाणी-
कैतवेन तटिनीतरुणीयम् ।
तं मुदा मदनभूभुजमेनं
स्वागतं किमिति पृष्टवतीव ॥ ३५ ॥

बहुपल्लवसेवनरञ्जितः
पिकवरः कलकूजितकैतवात् ।
मदनस्य जगद्विजयोल्लस-
द्विरुदवाक्यकदम्बमजूघुषत् ॥ ३६ ॥

राजते स खलु माधवागमे
कानने व्रततिवल्लवीजनः ।
प्राप्तमोद इव कुड्मलच्छला-
दन्तपङ्क्तिमनु सम्प्रदर्शयन् ॥ ३७ ॥

माधवस्य विविधेषु विलासे-
ष्वेधितेषु सुतरां व्यतिभाते ।
अद्भुतं हि कविवो यदराज-
दर्जुनः सुमनसेत्यनुरूपम् ॥ ३८ ॥

समिन्धमाने सति माधवेऽलं
प्रमोदभारानभजन् धरेऽस्मिन् ।
माधव्य आसां खलु तस्य सङ्गमे
सतीमणीनामनुरूपमेतत् ॥ ३९ ॥

मधुनार्पितं मधुरपल्लवं तदा
परिभुज्य सादरममी पिकद्विजाः ।
जगदुः प्रणादमिषतो मुहुर्मुहुः
कुशलं सतां प्रकृतिरीदृशी खलु ॥ ४० ॥

गन्धचोर इति तं सदाचरं
दर्शित द्विजवरै रुतच्छलात् ।
माधवो मधुपशृङ्खलारवै-
राबबन्ध विधुतां प्रदर्शयन् ॥ ४१ ॥

अस्मदीप्सिततमां हरितं ते
तात एष करसञ्चरदम्भोऽलम् ।
विध्यतीति मनसीव धनीपे
वक्तुकाम इव वाङ्मुखमागात् ॥ ४२ ॥

वसन्तसमये तस्मिन् लगन्ती मधुपावलिः ।
आकृष्य सुमनोग्रामं बुबुधे गीतमाध्वसम् ॥ ४३ ॥

तदानीं खल्वनिदानीमनवरतगीर्वाणगीर्वाणवेणीवितंसवाणीतरङ्गिणीवरणीयधोरणीधुरीणरमणीयचरणाग्रणीचरणीगीर्वाणगणमन्ततश्चरणीकृतचरणारविन्दः प्रणतजनकामितविरचनचिन्तामणिधरणीरुहायितकरुणारसतरुणावतरुणान्तःकरणो देशिकमणीन्द्रः करीवरसमाणगीर्वाणरमणीतन्तन्यमानतरुणीवनगीताकर्णनविदीर्णहृदयपथिकजनजाततापप्रशमनसमाश्रितगरीयसीरुहपर्यङ्कोत्सङ्गसन्तानालेपर्यन्तशोभितं, मरसीरुहवासिनीनवासवेश्मसमानजनगरीसंश्रयनारीराजितकबरीकान्तिलहरीवीक्षणसंभावितविभावरीसमागमश्रद्धानः सारं सारङ्गोपक्रान्तसौरतरथाङ्गमिथुनपक्षयुगलविक्षेपविकीर्णाणोज्ज्वलितरजतपात्रपरिस्रस्तसमीकृतपटवासमञ्चयपरागपरम्परापङ्क्तिपाण्डुरीकृताङ्कितकटकावलाशतसमुल्लासितं, पुरन्दरपुरीराजत्सुन्दरीवदनविभावरीकान्तविलोकनतस्स्तोकेतरकौतुकचकोरनिकरकूजितानुरञ्जितकान्तोपान्तकान्तारं, रसालसालतमालप्रियालप्रमुखसालावलिकमनीयकिसलयनिकरनिगरणरमणीयकण्ठकळकण्ठवरश्रवणीयरवश्रवणोत्कण्ठकण्ठीरवकुलकण्ठोपकण्ठाकुण्ठविक्षिप्तशुण्डादण्डवनशुण्डालवरकरटयुगलनिरर्गलनिर्गलद्दाननीरवीचीनिचयगन्धचोरसदाचरसञ्चारदरविदलितमन्दारकुन्दमाकन्दसिन्दुवारकुमुदकोकनदकुरवकमरुबककेतकीप्रभृतिसुमप्रकरपरागसन्दोहकर्बुरितमकरन्दवृन्दनिष्यन्दसन्दोहावहसेवासमागतगुहाशयमहीशयशुद्धान्तमहिळाशयपञ्जरालयविपञ्चिकावरहंसिकास्वनसमाकर्णननिरन्तरानिष्यन्दमानमन्देतरतटानिष्यन्दवृन्दनन्दनीयतरं, मन्देतरसिद्धिमदोऽयमिति उपान्तमुपसृतैः

रम्भादिममेनकान्तामरवारकान्ताधरपल्लवसमपल्लवोपभोगाभिलाषयां मञ्जुतरशिञ्जितव्याजान्मन्त्रमावर्तयद्भिरिव शारिकाशुकपोतकसङ्घातैरतिकान्तं, नितान्तसम्प्राप्तनिशान्ततया सुमनोरससञ्जिघृक्षयां नितान्तं परिभ्रमद्भिर्मधुपैरभिगकटयन्तमिव नात्र मधुपानमवकाश इति, कृतज्ञतयैव प्रतिदिवसं व्याकुर्वद्भिरिव परेभ्यो मञ्जुतरमालपद्भिरुद्भासितं परभृतैः, क्रियाकलापनिर्वर्तनकलेतरवालखिल्यप्रमुखकान्तारावसथैस्तापसयूथैरपि पर्वतशिखराग्रात् पतितश्रमेकमिति प्रदर्शयद्भिरिव शिखराग्रान्निष्पतद्भिर्निर्झरसङ्घैः समलङ्कृतं , शिलाकलापाधुपकण्ठेनापि स्निग्धतरविमलान्तर्हृदयेन करणीयेव सता सर्वदा परोपकृतिरुदकेनापीति प्रकाशयद्भिरिव पयोवितरणतत्परैः वापीकूपतटाकादिसरःप्रवरैरभिमण्डितं, शिखाण्डिमण्डलतुण्डानिलपारणोत्थितकुण्डलीन्द्रमण्डलसुखनिद्रादण्डजरज्जुलपण्डलेन्द्रपरिमण्डितं, अनुवादमधरीकुर्वद्भिरिव क्रीडितं मृडानीवल्लभभूमीभृतः , प्रतिसर्गं प्रालेयशैलस्य, द्वैविध्यं विन्ध्यस्य, द्विर्भावं प्रभाकरभूधरस्य , मूर्त्यन्तरं मन्दरस्य, वसुधातलसम्भूतमिव सुधान्धसां सुकृतसमाजं , मानसमदकारिणमपि मानसमदहारिणं , वासन्तिकपादपसमुदायमिव घनपुष्पोल्लसितं, शिखीक्षुमिव शैत्योद्भासितं, वार्णिवरमिव प्रशस्तशेखलं, निखिलजनमनोरञ्जनमभिवीक्ष्य समन्तात्तमनन्तानन्ताधरं तत्र च नितान्तं वीक्ष्य लसन्तं वसन्तमवगाहे चामोदसरस्वन्तम् ॥

एषोऽनन्तक्षितिमृदधिराड्राजयार्थं निनीषन्
वह्नीनादीन् द्विजनृपकरादीन् परेभ्यो विजानन् ।
आहूयैतान् सुरपथमहामण्डपे संविचार्य
प्रत्येकं यद्भिदिववसतां पश्यतां नीतिमार्गम् ॥ ४४ ॥

आलोच्याद्यं सुहुतवहनेऽन्यानिदानीं नियोज्य
रन्ध्रे नूनं महति च भृशं राजतेऽन्यत्र दण्डे ।
इत्यस्माकं बहुतरमयं बन्धुवर्गाभिमानादिन्दुः पूर्वं निजकुलगुरू रौहिणेयावतारे ॥ ४५ ॥

यत्क्षोणीधरतुङ्गशृङ्गविलसत्सालं समीक्ष्योन्नतं
देवः कश्चन पाकशासनपुरप्रोत्तुङ्गकेतूत्तमम् ।
गन्तुं निर्जरपत्तनं कृतमतिस्तल्लक्ष्मदर्शी जवा-
द्गत्वा स्वर्गमधश्च वीक्ष्य कुसुमं तत्राशशङ्के परम् ॥४६॥

वियत्करेणौ वियदापगाया-
मगाधतोयेष्ववगाहमाने ।
यन्ता समारुह्य यदद्रिकूटं
दूरीचकारातिनिपातशङ्काम् ॥ ४७ ॥

वियत्करेणुर्मदविह्वलाक्षो
यदद्रिकूटं वियदापगायाम् ।
विलोक्य तत्रत्यकरीरराशा-
वाशापरीतः खलु चुम्बति स्म ॥ ४८ ॥

यदाद्रिकूटोपरि राजमाना
वापीः प्रसन्नोत्पलसारसास्ताः ।
उल्लासभाजां त्रिदशेश्वराणां
व्रातो वधूनामवगाहते स्म ॥ ४९ ॥

यदद्रिवापीविहरद्दिवौक-
स्सीमन्तिनीवक्त्रसरोरुहेषु ।
निशाम्य नेत्राणि जवेन नून-
मिन्दिन्दिराः स्वीयधिया भ्रमन्ते ॥ ५० ॥

यदद्रिकूटे कमलानिवास-
सेवाविशेषोल्लसता जवेन ।
मृगाङ्कबिम्बेन करोति काचित्
तन्नामगन्धान्मृगनाभिशोभाम् ॥ ५१ ॥

मृगनाभिविशेषकं ललाटे
कमनीयं विधृतं तया तदानीम् ।
अपरा तु समीक्ष्य मार्गमाणा
मृगनाभिं न हि तादृशं त्ववाप ॥ ५२ ॥

यदद्रिरामाशिखराग्रफाले
मुक्ताललन्तीव विराजतीयम् ।
नक्षत्रपङ्क्तिर्नयनप्रमोद-
प्रदा सदामोदकरावबद्धा ॥ ५३ ॥

उत्तुङ्गयत्पर्वतशृङ्गराज-
त्तारावली तत्र सरोरुहाणाम् ।
पत्रस्थिताच्छाच्छपयःकणानां
रीतिं विशुद्धां विवरीकरोति ॥ ५४ ॥

मत्सूनुभग्ना अपि कीचकाः पुन-
र्यस्मिन् भणन्तीति कथं नु निर्भयाः ।
आलोकितुं प्राप्त इव प्रभञ्जनो-
ऽनन्ताचले मन्दगतिर्विराजते ॥ ५५ ॥

यदद्रिशृङ्गोपरि तुङ्गसालान्
सालाः सुराणामवलोक्य नूनम् ।
तत्साम्यलाभाय नभोऽन्तराळे
स्थित्वा सुमैर्विष्णुपदं यजन्ति ॥ ५६ ॥

यदद्रिसद्मामरसुन्दरीणां
मुखारविन्दस्य विलोकनेन ।
त्रपापरीतं सरसीरुहाणां
वृन्दं विलीनं समभूद्वनेषु ॥ ५७ ॥

यत्स्फाटिकोत्तुङ्गतटेषु दृष्ट्वा
निजां प्रतिं निर्जरसः कदाचित् ।
त्वरातिरेकात् प्रविशन्त एव
प्रज्ञावतां हास्यपदान्यभूवन् ॥ ५८ ॥

यो भूधरः सद्धरतानुबन्धा-
न्नूनं सुधादीधितिदर्शनेच्छुः ।
भूरुट्करैः स्वयफलप्रसूना-
न्यादाय तद्दीधितु तिष्ठतीव ॥ ५९ ॥

मत्वा तदुर्वीधरहेमकूटं
त्रिविक्रमस्वामिकिरीटकोटिम् ।
अकाण्ड आसीत् स कथं प्रगल्भा
अपि भुवं नभ्रपुरित्यजस्रम् ॥ ६० ॥

फणाधरवराच्यः सुरनरेशवरभोल्लस-
त्सुवर्णमयगोपुरस्फुरदुदग्रशृङ्गश्रियम् ।
स एष शिखरैरलं प्रकटयन् भृशं राजते
प्रियापरवशो रसोल्लसिततुङ्गशृङ्गः सदा ॥ ६१ ॥

रमणीयतमां गुरूत्तमः
फणिराड्धरणीधरस्य ताम् ।
सहसाधिययावधित्यकां
स सहानुचरैः सदग्रणीः ॥ ६२ ॥

तदनु समन्तादुद्वीक्षितचक्षुःश्रवोध्यक्षक्षोणीधरः स गुरुपुङ्गवः स्वच्छतया स्वादुतया च भगवतस्तस्य शतपत्रवासिनीर्भर्तुरङ्कुरयन्तीमनुकम्पारसभरसङ्गां, शशाङ्कवद्विलसत्कमलां, मेघमालामिव कादम्बिनीं, ऊर्मिलामिव लक्ष्मणोपेतां, सरस्वदुपान्तभूमिमिव विलसत्प्लवां, वीणामिव प्रवालरमणीयां, उद्यानभूमिमिव भृङ्गवरशोभमानां, निष्यष्टकवन्मकरकच्छपालङ्कृतां, दिग्गजराजांमिव कुमुदपरिराजमानां, सङ्ख्यामिव महाशङ्खकमनीयां, पद्मनाभनाभिमिव सारसोल्लसन्तीमः ससाद स्वामिपुष्करिणीम् ॥

तदानीं तु स गुरुपुङ्गवो गाहमानजनतापहारिणि वारिणि रमणीये स्वामिपुष्करिण्याः निर्वर्तितस्नानादिनियमकलापो लसदूर्ध्वपुण्ड्रभसिततुलसीनलिनाक्षमालिकः सञ्चितचम्पकपङ्केरुहप्रभृतिसुमप्रकरः दर्वीकरवरगिरिवासप्रीतबहुवासरैर्विनयातिरेकभासुरैर्भूसुरैः सततमुपसृतपरिसरतया पुलस्त्यपुलहप्रभृतितापसव्रातसमेतप्रभाकरसमीभावमधिवहन् अम्भोरुहवासिनीनिवाससदनाभिमुखो निरगमत् ॥

एवं निर्गतो गुरुरग्रत एव प्रत्यग्रमणिप्रत्युप्ततया प्रभाकरमङ्कमिव सेवकजनभावुकपङ्कजप्रकरविकासनस्य, वसन्तसमयमिव प्रणतलोकसुकृतव्रातचूतसमुल्लासस्य, शतधारमिव विश्वव्यामोहमहीधरभेदनस्य, सत्कविकाव्यमिव सुवर्णभासमानं, पङ्केरुहकर्णिकोपमानं विमानं कमपि विलोकयमानः चामीकरधरणीधरमिव कल्याणवितरणप्रवीणं, प्रभाकरमिव प्रबोधजलजातविकासापादकं, विद्युत्सन्दोहमिव घनप्रकाशावहं, वासन्तिकपादपसमुदायमिव सुमनोभिरामोदितं, पाणिनीयतन्त्रप्रवर्तकतपोधनसम्बाधमिव वररुचिरमणीयं, निष्यष्टकमिव शङ्खपद्मोल्लसितं नीलालङ्कृतं च, यशोदानन्दनमिव नन्दनीयनन्दकामितप्रदं, रत्नाकरमिव लसमानोर्मिकं, प्रावृट्कालिकनभःस्थलमिव राजदिनमणिवलयोल्लसितं, उद्यानवनतल्लजामिवाभिनवमालिकामणिधरमकुटोज्ज्वलं, वरदराजमिव काञ्चनकाञ्चीमाबिभ्राणं, आर्यावर्तप्रदेशमिव प्रचकासत्कुण्डलकवचोज्ज्वलकर्णाङ्गदेशसमुद्भासितं, पद्माकरमिव चक्रराजराजमानं, वनितामिवातनुसमीरलीलोपयोगिनीं, सपरोन्मुखमेघनादवाचमिव रक्षोभयविधायिनीं मुनिजनमानसमत्तदन्तावलालानायमानां निखिलजगदामोदकीं कौमोदकीमाबिभ्राणं, देशजातोल्लसिताख्यातिशोभितयापि न देशजातोल्लसिताख्यातिशोभितया, अङ्गदविलसितयाप्यनङ्गदविलसितया कैलासलक्ष्म्येव अलकान्तोल्लसमानया, मत्तमातङ्गवदानवारिमनोहरया, रामधनुर्वल्येव रक्षोपायविधायिन्या श्रुत्यन्ताकृष्टगुणविशेषया च, भूसुतयेव जनकामितसम्पत्प्रदया, वासुदेवलीलयेव नरकच्छेदिकया, प्रावृट्श्रियेव विलसद्धारपयोधरभासमानया, अभिनवप्रभासा रङ्गराजपरितोषप्रदया, कामधेन्वेव श्रीवत्सार्णवासरसिकया, त्रिदशेश्वरसम्पदेव विष्णुपदाश्रितया, प्रियतमया

रमया संशोभिनवक्षस्तटं, जाजीराजीवपारिजातजातीतुलसीमालतीकुटजमञ्जरीपुञ्जपरिनिष्यन्दमानमाध्वीकपानपरमादरपरिपातितदीधितिपरीवाहरान्दोहसन्देहापोहकङ्कारारवनिगमभृकरव्रातरमणीयतनुं, सेवकजनकामितं वितरीतुकामो विचेतुमिव निचयं तेषां काननौकसामधिसमीरणचरणाग्रणीधरणीधरशिखरगतितरां समिन्धमानम्, अरुणसारसराजमानवरुणारण्यपरिपूर्णारुणनयनं, स्वकृपापगापारकल्लोललवलेशप्रशमितापरिमितदुरितजनजातदत्तरमाद्भुतभूतिमपारनिजभूतिं, सुरसार्थपोषकमपि नरसार्थपोषकं, तमोदाहरणसमर्थमपि नतमोदावदहरणसमर्थं, रघवारीशुशमनक्षमलीलमपि नराघवारीशुशमनक्षमलीलं, वारिजासनकलितोल्लासविलासिनमपि नवारिजातासनकलितोल्लासविलासिनं, वनितापापहारिणमपि अवनितापापहारिणं, अधिगतपरमानन्दमपि अनधिगतपरमानन्दं, तारकान्तलसद्वपाननमपि नतारकान्तलसन्मानाननं. वसुदेवजेवितमपि सेवितवसुदेवं, आशोदितसुमनःपुञ्जमपि सुमनःपुञ्जाशोदितं, रञ्जितकान्तारावासजनविलासमपि भञ्जितकान्तारावासजनविलासं श्रीनिवासं विलोकयामास ॥

देशिकः स सम्भिवन्द्य पुनः पुनस्तमिन्दिरारमणं समर्घ्य च तस्मै मिथोपहारं कुतोऽपिहारं सङ्गृह्य सादरं शिरसा तत्प्रसादं तदनु समस्तावदेवं देवम्—

आमेनवचनभासं चम्पकाभिख्यनासं
सितरुचिसमहासं सज्जनस्वान्तवासम् ।
वृषगिरिगह्वरिनिवासं वेदविद्वेषिशासं
विहितबहुविलासं तं भजे श्रीनिवासम् ॥ ६३ ॥

दनुजकुलकुठारं सन्धृतानेकहारं
निजरुचिजितमारं गोपिकायूथनारम् ।
उरसि विधृतदारं संहृतेलातिभारं
भवधरशतधारं साध्विकन्याविहारम् ॥ ६४ ॥

तदानीम्, इत्थमभिष्टूयमानस्तदीयतपश्चर्यापरितुष्टमानसो भगवान्भोरुहवासिनीनिवासः समवादीदेवं प्रददामीति सकलेप्सितं ते । तदनु गुरुरपि सादरमभाणीदेवम् —

यदि रासि मदीप्सितं रमेश
शरणं प्रवृणे सतां गतिं त्वाम् ।
प्रददातु रतिं त्वच्चलां त्व-
च्चरणाब्जसुधारसस्य पाने ॥ ६५ ॥

तदवकर्ण्य फणीशगिरीश्वरः
पुनरुवाच गुरुं निरपेक्षकम् ।
तव सदास्ति मदीयकथारति-
स्तदितरं वृणु मत्परमं वरम् ॥ ६६ ॥

इति समभिहितं महाभागवतं भावना दत्तवता आर्यवर्येप्सितं पूर्वमेव करुणार्णवेन नारायणेन वरानपि [illegible] सन्तानः पुनरपि परमपुरुषपादपङ्कजपरिचर्यादरातिशयदानेन पूर्णकामनिर्विशेषं गुरुवरमनुगृह्य परमाशीर्भिः, असङ्ख्यानं निजानिशेषान् शास्त्रशिष्यान् च स्मृतः स्मृतः पुनःपुनरायास्यामीति पोषयित्वा च तं नानाविधजनपदाधिवासागमिरभिनवरमणीयाग्रहारैरभिपूर्णं निजभवनम् ॥

तदन्वनवाप्यामपि समवाप्य वैकुण्ठेशापारकृपां स्वप्नानुभूतामिव पन्नगेन्द्रधराधरराजाननारायणपादाब्जनतमाधवेणमन्त्रापणादिकं सम्भावयमानो भगवतोऽपारवैभवान् सदाराध्य तं भगवन्तं निजानिशेषमन्त्रोजवासिनीलिशान्तं सम्प्रणम्य पुनः पुनः पादिक्षाचत्वालयानिलात्मजं तं, ततश्च नरके सरिच्चरणनालेनाम्बोकनलसमानवानसः सहितः परमभागवतैः सहितां काञ्चनगृहमञ्चयैः काञ्चीं नाम काञ्चन कमनीयां नगरीमानञ्चायमाचार्यः माचार्यः ॥

या च सेवासमायातपाकाहितानीतपारिजातप्रसूनसमजातमधुमरमकरन्दास्वादनसंभ्रमसम्पतद्भ्रमरझङ्कारसङ्कारिभूतनेतरभाषितस्तवदत्तादरश्रुतिश्रुतिचक्षुर्जनानिशेषचरणारविन्देन बालारुणमणिमालालसिततनुलीलाविजितारिपुजालाश्रितजनपरिपालाभ्युदयलासमरुचिपशुपालबालाजनवरोल्लासनाति शालसमोपेलयेन सीमारहितमहिमासहितराकाहितङ्करपाकाहितप्रदमागहितप्रमुखलेखाग्रणीविहि-

तानवद्यस्तुतिपरिगृहीतमहितामितगुणगणपरिवीतमानसरिपुभीततापस-परिगीतसङ्कटपरिपाटनक्रमपटुतरचटुलचरितभुवनविदितनिजमङ्गलदेव-तात्प्रियतमभावेन तोत्राहृतगोत्राहितपत्रामितगतिजैत्रातुलरययात्राविशेषचित्रांशुमित्रातिरयगर्वसर्वस्वनिर्वापणधुरीणसाधारणेतरवरणीयगतिधोरणीसमेतविनतासुतारूढवनितायुतानेकद्विजातानीतफलजातास्वादनसञ्जातामितमोदेन वरदेन परिपालिता समृद्धतरसर्वार्था दरीदृश्यते नितान्तमद्यापि ॥

यां च राकाशशिकान्ताननिर्जरलोकाखिलशोकापोहकसेवकजनाभिमतदायकाचरितनायकाधिकमोदकादद्भुतकामरसाश्रयमानसारुणसारसाङ्घ्रियुगलसामगानपरसाधुसङ्गपरिसाधिताधिकतरभावुकया वीक्षणमात्रक्षपितास्खिलरक्षोगणलोकत्रयरक्षाविधिदक्षाद्भुतचरितयक्षाधिपीकृतनिजपक्षाश्रितजनपथोरुहाक्ष्या कामाक्ष्या सहितः स हि मानी महनीयमहिमा हिमानीधरतनयाकामुकः सेवकजनकामितवितरणगीर्वाणतरुरिवसति ॥

सन्दृश्य तां तु वरदस्य पुरीमुदार-
मेधाविलासजितगीष्पतिरार्य एषः ।
त्रैगापगाविरचितोचितकाल्यकर्मा
सेवार्थमाप सदनं वरदस्य तस्य ॥ ६७ ॥

संसेव्य भक्त्या भगवन्तमार्य-
स्ततः समुद्वीक्ष्य मनोभवाक्षीम् ।
गोपालकृष्णाख्यगुरुं महान्तं
संसेवितुं तस्य निशान्तमाप्नोत् ॥ ६८ ॥

तदनन्तरं गुरुरेषोऽनुदिनमनतिक्रान्तनिजदिनचर्यं सज्जनवर्यं निगमान्तसारसारार्थबोधननिरतं श्रीमन्नारायणचरणारविन्दगाथासुधारसपानाभिरतं श्रीरामचन्द्रमन्त्रयन्त्रतन्त्रार्थव्याख्यातारं आश्रितजनत्रातारं सेवकजनकामितवितरणगीर्वाणतरुं धरणीगीर्वाणगुरुं तं गोपालकृष्णं तुलसीकुसुमानयनारोपणासेचनादिभिशुश्रूषाभिः शुश्रूषमाणस्तत्रोवास कतिचित्कालम् । तदानीमभ्याजगाम च निदाघसमयः ॥

शुक्रागमे सुमनसां भृशमाविरासी-
दुल्लासहानिरिति साम्प्रतमेव यस्तत् ।
तस्मिन्नवाप समये तु पलाशसङ्घः
खेदं नितान्तमिति यत्तदिदं विचित्रम् ॥ ६९ ॥

विव्याथ लब्धावसरः प्रभाकरः
स्वैरं स शुच्याश्रयगर्वितः करैः ।
अस्मत्कुलीनप्रमदापहारिणो
नूनं पलाशा इति सेर्ष्यमद्य तान् ॥ ७० ॥

अह्नामधीशः खररश्मिसञ्चयै-
रह्नाय धात्रीजनितान् विधुपियान् ।
सम्पीडयामास स लोकबान्धव-
श्चिन्नं धरिष्यामिति यद्विजृम्भते ॥ ७१ ॥

पादपान् करसहस्रपीडितान्
नात्यजन् द्विजवरा इति ध्रुवम् ।
पूर्वमस्मदुपकारिणो ह्यमी
सूचयन्त इव तां कृतज्ञताम् ॥ ७२ ॥

पत्रदानमपि नाचरन्ति ये
तानमी द्विजवराः समत्यजन् ।
दानतत्परजनस्य सेवनं
ह्याचरन्ति धरणीतले जनाः ॥ ७३ ॥

विजहौ विधुरपि जाड्यं
हिमकिरणोऽयं जडाशयोद्भूतः ।
तदिदं प्रार्थितं भुवने
यच्छुचिसङ्गो हरेज्जाड्यम् ॥ ७४ ॥

तदानीं तु —

प्रोद्बुद्धविष्णुः शितिगलकुलाह्लादसङ्घातदायी
मेघश्यामो मदनजनकश्चञ्चलाश्रीनिवासी ।
सम्प्राप्तोऽयं घनरसमयः शक्रकोपप्रदायी
दातुं नूनं चिरतरतपःस्थास्नुभिः प्रार्थितार्थम् ॥ ७५ ॥

अतनुतापविदारणकारणे
रसमये समये समुपेयुषि ।
अपि मलीमसतामनवस्थितिं
समधिगच्छति कृष्णघनोऽद्भुतम् ॥ ७६ ॥

प्रतिक्षणं प्रस्फुरति प्रमोदात्
स्मरेऽपि तस्मिन् समये नितान्तम् ।
प्रोज्जृम्भते शम्बरवृद्धिरासी-
देतद्विचित्रं भुवनत्रयेषु ॥ ७७ ॥

रसारुहाणां रसकामुकानां
तदाविरासीदमृतं नितान्तम् ।
उपस्थिते कृष्णमहाघनौघे
तपःस्थितानां किमलभ्यमस्ति ॥ ७८ ॥

रमानिवासा अपि पद्मसङ्गा
विषादितरेकेण विषादमापुः ।
स्थिरात्मनामुल्बणसङ्गमेन
हानिर्भवेदित्यपि दर्शयन्तः ॥ ७९ ॥

तदानीमेवं विलसति वर्षासमये कश्चन चतुरः शिष्यवरीणः सम्पाद्य चाभ्यनुज्ञामस्मदार्यस्य सामोदं समवर्णयदेवं चित्रतरम् ॥

व्रातो मरुतां समीक्ष्य शुक्रान्ते-
वास्यभ्युदयादतीव तप्तः ।
वीतां सुमनस्ततिं विहाय:-
पाथोधिं विममन्थ सोऽमृतेप्सुः ॥ ८० ॥

विमथ्यमानात्तरसा मरुद्भि-
र्नभःपयोधेर्घनमन्दरेण ।
तदा समुद्भूतमहाविषौघै-
स्तृप्तिं भजन्ते शिवकण्ठसङ्गाः ॥ ८१ ॥

निर्मथ्यमाने नितरां नभोम्बुधौ
सा कामधेनुः समभून्मनोहरा ।
इष्टार्थसिद्ध्या परितोषयन्ति यां
रामासमेतास्तरुणास्तपोधनाः ॥ ८२ ॥

संसारेषु न चान्यदस्ति नितरां सम्प्रार्थनीयं यतः
यं सम्प्राप्य महत्तरं पितृऋणं दूरीकरोति क्षणात् ।
लाभे यस्य महीयते क्रतुभुजां लोकं नितान्तं सुधीः
सोऽयं विष्णुपदाश्रयः समभवत्सन्तानभूमीरुहः ॥ ८३ ॥

विमलाप्सरसां सङ्गास्तदानीं प्रमदावहाः ।
रसातिरेकाद्विलसन्मञ्जुघोषोपशोभिताः ॥ ८४ ॥

तदाभवद्दिव्यतमामृतानां
निषेवणात्संविजहत्सु तापम् ।
मरुत्कदम्बेषु विचित्रमेत-
द्यच्छक्रकोपः समभून्निरन्तम् ॥ ८५ ॥

अधित्यकानिकटं विपाटयन्ती
विटपिवरांस्तटिनी प्रदर्शयन्ती ।
इति जडगतयो निजाश्रितानां
मपि विरराज विरोधमाचरेयुः ॥ ८६ ॥

आश्रुत्य चेत्थमत्यर्थं कान्ततममुत्प्रेक्षितमन्तेवासिना निजोपान्तवासिना वीक्ष्य स तस्योपान्ते विलसन्तं नारदादिमुनिवृन्दमिव इन्द्रासदनसमानं दिनं, जयद्रथजन्यमिव प्रशस्ततमसुमनोव्रातरञ्जितार्जुनकीर्तिहरं, पयःपारावारमिव परिशुद्धतमामृतवितरणजागरूकं, गान्धारराजतनूजमिव धार्तराष्ट्राह्लादकरं, वैनतेयमिव विषधरनिर्यापणकारणं, मेदिनीशसभान्तरमिवानुद्भूतबलाकुलकोलाहलं, तपोधननिकुरुम्बमिव समुद्भासितमहत्तमजात्या, श्रीरामचन्द्रमिवागस्त्यामोदविधायिनं, केदा-

रक्षेत्रमिव स्वयमासन्नतमहिमागमं शरदागममुद्वीक्ष्य नितान्तमानन्द-रससान्द्रीकृतमानसो बभूव ॥

तथा खलु गुणाम्बुधेर्गुरुवरस्य वीक्षाटवी-
विहारिहरिसेवने धृतविलासमासीन्मनः ।
सनातनसरस्वतीमणिकिरीटपारम्परी-
विचारणकृते चिरं निवसतः सदेशे गुरोः ॥ ८७ ॥

निर्गम्य काञ्च्या निजदेशिकानां
निदेशमासाद्य सदासवर्गः ।
तदा समागाद्गुरुसार्वभौमो
वीक्षावनं राघववीक्षणार्थम् ॥ ८८ ॥

वीरराघवविलोकनोल्लस-
न्मानसः समगमन्स मे गुरुः ।
प्राक्तनोक्तिमयपोत्रिसन्निधिं
पार्थसूतमवलोक्य सादरम् ॥ ८९ ॥

तत्र वीक्ष्य कमलासखं किटिं
प्रत्नसूक्तितनुकोटिसप्रभम् ।
देशिकः समभिवन्द्य सादरं
सैष कानि च दिनान्यनन्दयत् ॥ ९० ॥

प्राचीनसूक्तिमयपोत्रिवरस्य वाणी-
माकर्ण्य देशिकवरः सहसादरेण ।
आसाद्य भूपपशुपालपुरं पुराणं
संसेव्य नन्दतनयं मुदमाससाद ॥ ९१ ॥

स रङ्गपुरवासिनं जलधिकन्यकाकामुकं
समैहत विलोकितुं सकलवावदूकाग्रणीः ।
सनातनसरस्वतीशिखरसूरिरस्मद्गुरुः
समासददिमां पुरीं तदनु दासवर्गैः समम् ॥ ९२ ॥

इति श्रीसीतारामसूरिविरचिते कविमनोरञ्जके तृतीयोल्लासः ॥

अथ चतुर्थोल्लासः ।

अनन्तवाणिश्रीणवन्द्यचरणं प्रज्ञाधनाग्रेसर
श्रीषद्दङ्गपुरीणरम्यनगरीमाचार्यमभ्यागतम् ।
आलोक्यागमसौष्ठिमारसिकाः केचित्कलावल्लभाः
प्रत्युज्जग्मुरिमे मुदा दिनिपदः कान्तं रमाया यथा ॥ १ ॥

तदनु सोऽयं निजनैष्ठिकानुष्ठानबद्धशुद्धान्तःकरणः विशुद्धधरासुरेन्द्राराधितनलिनवरणः भयार्तकरुणामरणान्तःकरणः अस्मदाचार्यो निजजनसंरक्षणानुरागदक्षदीक्षित षड्राजः कुलोत्तमानतिलककुरवकबकुलसरलचन्दनमन्दारकुन्दनदकाश्मरसरसमधूकदग्वजम्बीरजम्बूदाडिमादपविभक्तकुसुमलग्नमकरन्दास्वादनसमुत्सर्पदद्भ्रभ्रमरनिकुरम्बसमाकर्षानोभयतीरसरसी कलिन्दनन्दिनीविलसन्पार्श्वोभयसरस्वतीरीतिमनुवर्त्तन्तीं, करुणाभरणमाणिक्यरत्नशालिकायमानां, समाश्रिताशोकवनिकावनिकाकाकलीं मदकलां, दोषाकुलश्लोककदुपकान्तागण्डगुडक्षणिक्षपगजानां पद्यमानां, समज्जज्जडान्तरगमपि नमज्जनदुरितहरं कावेरीसवनाय महानदीं विलोकयपुष्करिणीमपि समाराधयन्नमिश्वाकुकुलाभ्यर्णं रक्षन्धोभ्यक्षानुजं निजजनसंरक्षणबद्धदीक्षं पङ्कजाकरसमूहाचलमिव समालम्बकुलीनं सुधर्मसभान्तरमिव हरिणोद्धामितमवलोक्य रङ्गराजाभिधं जनमनुमण्टपमधिमण्डितमासासाद मन्दिरमिन्दिरारमणस्य ॥

विचित्रमानन्दविधानिधानपुरं
सरस्वतीकान्तमयत्नपुण्यम् ।
सभोगवान्गीर्वृषदीक्षितं-
मकीर्णमाभादहिमाम्बुशीतलम् ॥ २ ॥

रङ्गेशचूडामयमाम्नाण-
निर्माणवेदुष्यतरङ्गणीशम् ।
निरन्तरं निर्जरवारकान्ता-
तन्तन्यमानातिविचित्रलास्यम् ॥ ३ ॥

दिने दिने पल्लवतोरणावली-
.प्रसादनैकोत्सुकतारकाभिकम् ।
विरिञ्चशुद्धान्तवधूविपञ्चिका-
निनादविश्राणितकर्णकौतुकम् ॥ ४ ॥

राजीवजाजीमुखपुष्पमालिका-
निर्माणसाकाङ्क्षवसन्तसंयुतम् ।
सेवासमायातसुपर्वपुङ्गव-
प्रोद्भासिदन्तीन्द्रमदौघपङ्किलम् ॥ ५ ॥

विनीतपाकाहितपक्ष्मळेभ्रणा-
प्रसार्यमाणागरुधूपवासितम् ।
समासदद्रङ्गधुरीणसन्निधिं
सदासवर्गः स ममैष देशिकः ॥ ६ ॥

करुणावरुणालयस्तदा
गुरुणा परिणूतसद्गुणः ।
शरणागतरक्षणक्षमो
ददृशे करुणार्णवेन सः ॥ ७ ॥

वरुणालयजातसुन्दरी-
रमणं नयनारुणाम्बुजम् ।
शरणं प्रणनाम देशिको
जगतां स हि रङ्गनायकम् ॥ ८ ॥

तदनु देशिकोऽयं वाताशनेशशय्याधिशायिनं कल्याणगुणगण-सर्वातिशायिनमगणितनिजमणिगणकिरणविद्रावितनिबिडतरातिमिरफ-णीन्द्रफणाततिसम्पादितासितातपत्रशोभं अम्भःप्रदसप्रभं भगवन्तं रङ्गनायकमभिष्टूय विविधैः स्तवैः शिष्टवर्गतुष्टिप्रदैरिष्टवर्गसहितः, तत्सेवाव्यपनीतबहुवासरः समधिगत्य सत्तमसमाधिष्ठितं गोष्ठीपुरं निजजनमानसमानसनिवासनिवासायमानपदसारसं सरीसृपपतिपर्यङ्क-शयनं सारसनयनं सम्प्रणम्य सौम्यनारायणं संस्तूय सुतरां समगाद-गवरमृषभाद्रिम् ॥

तदनु सैष गुरुर्गुणवारिधि-
स्तमधिरुह्य धराधरमद्भुतम् ।
समवगाह्य च नूपुरपूर्विकां
सुरनदीमकरोन्निजनैष्ठिकम् ॥ ९ ॥

इन्दिरारमणमन्दिरमेष
ह्यायया मदनसुन्दरमूर्तिः ।
सेवितुं स किल सुन्दरराजं
राजमाननिजलोकविनोदम् ॥ १० ॥

तदनु सुन्दरराजविलोकनो-
ल्लसितमानस एष ममार्यः ।
समभिवन्द्य स तं भगवन्तं
बहुतरं प्रशशंस च भक्त्या ॥ ११ ॥

समधिगत्य ततः स पुरीं मधुरां मधुराधिपसिसेविषया सेवकजननिरन्तरप्रमोददायिनं मन्देतरसौन्दर्यशालिनं निखिलभुवनराजं सुन्दरराजं तं भगवन्तमभिवन्द्य भार्गवीरमणं निटिललोचनदावानलज्वालायितचटुललीलावलोकनतूलायमानमदनं कृतनिजजननिखिलरिपुमदनं निजतनयसितांशुसमुपलालनकौतूहलादिव समागतसुरसरित्समुद्भासमानमौलिं शशाङ्कमौलिं वृन्दारकसन्दोहसंवन्द्यमानवन्दारुवृन्दवाञ्छितप्रदानमन्दारपादपायितपादारविन्दममन्दपरमानन्दं तं सुरेश्वरं वीक्षणमात्रनिर्वर्तितभुवनत्रयरक्षां शिक्षितसुम्भनिसुम्भप्रभृतिदानवाध्यक्षान्निजजनपरिरक्षणबद्धदीक्षां समीक्ष्य च मीनाक्षीमाजगाम नवग्रहग्रावसागरम् ॥

तदा तु किल —

तदीयवाचानिचयप्रचारं
समीक्ष्य नूनं त्रपयाम्बुराशिः ।
तिरोहितं वीचिचयं चकार
प्रकाशयन् सज्जनरीतिमेषः ॥ १२ ॥

अथ खलु समवगाह्य तत्र विचित्रतरे पारावारेऽभिवीक्ष्येक्ष्वाकुकुलक्षीरोदधिरङ्गलक्ष्मलक्ष्मणाग्रजविनिर्मितक्षारोदधिसंलक्ष्यमाणसेतुं तद्दर्शनानन्दितमानस एवमाचचक्षे —

वन्दे सेतुं सेवकाशेषदोषान्
निःक्षेपं तं नाशयन्तं महान्तम् ।
सीतामानुं निर्मितं राघवेण
प्राप्तुं कीर्तिं शिक्षितुं राक्षसान्च ॥ १३ ॥

पुनः सविनोदम्—

रघुवंशभवा वराधिनाथाः
स्वपदाक्रम्य विपक्षभूभृतस्तान् ।
विलसन्ति महानयं स सेतु-
र्बत संराजति सूचयन्निवेति ॥ १४ ॥

पुनः सविमर्शम्—

पदा क्रमितुमक्रमः किमिति सोऽब्धिकन्याप्रियः
निजश्वशुरसागरं समकरोत्ससेतुं तदा ।
निजान्वयजनोत्तमैरिति कृतः समुद्रो ह्ययं
समुद्रयितुमुत्सुकः किमिह सेतुमुद्रां व्यधात् ॥ १५ ॥

अनन्तरमनन्तरविसप्रभो निगमान्तगुरुकुञ्जरः रञ्जितनिखिललोकः सञ्जितसकलवादिजनो भञ्जितकुसुमेषुपृषत्को वञ्चितकामाद्यमित्रषट्कः सञ्चितपञ्चजनपञ्चाननपादारविन्दपरमाद्भुतभक्तिरस्मदार्यवर्यः समाजगाम काण्डासनकोटिम् ॥

तत्र हि —

नेनर्त रत्नाकर उद्धृतोर्मि-
प्रबाहुरारादिव वीक्ष्य हृष्टः ।
गुरुं भवाम्भोधि विमुक्तदोषो
गुणाम्बुधेः स्पर्शनतोऽधुनेति ॥ १६ ॥

कल्लोलकोलाहलकैतवादयं
संराजते पातकिनोऽपि वारिधिः ।
रक्षाम्यहं स्नातृजनान्वदन्निति
श्रीरामगाथाश्च पठन्निहानिशम् ॥ १७ ॥

स खल्वायोधनधरणीतलमिव नृत्यत्कबन्धं वसुमतीपालयितार मिव वाहिनीशतनेतारमवगाह्य मुहुर्मुहुरम्भोनिधिमकरोत् सप्तदिनसप्त-तन्तुम् ॥

प्रस्थाय बाणासनकोटितो गुरु-
र्भक्तेष्टविश्राणनबद्धकङ्कणम् ।
श्रीरामनाथं समगात् सिसेविषु-
स्तन्मन्दिरं तीर्थवरैर्विराजितम् ॥ १८ ॥

समाभिषिच्य गुरुर्गुणवारिधिः
सुरनदीसलिलेन सदाशिवम् ।
प्रकटितार्थसुधामनदीपिका-
धरवराभिधमेनमथाकरोत् ॥ १९ ॥

तदनु देशिकोऽयं प्रस्थाय ततः तीर्थनायकस्थलात् नृपवरपुर-मिव सदारामोल्लसमानं गण्डकीसिन्धुवत् सचक्रतीर्थं तारकागणमिव कलानिधिकान्तं प्रकटितस्ववाच्यार्थैः चन्द्रशालासार्थैः समुद्भासमानै-र्द्विजवरभवनैः परिराजमानमधिगत्य पट्टणं कुशशयनाभिधानं सम्प्रण-म्य रघुनाथं निजनाथमस्तावीत् ॥

लोष्टीकृतानिष्टसा-
ष्टापद एषोऽस्मदाचार्यः ।
जातस्ताम्रासेवा-
चिरकांक्षी चित्रमेतद्धि ॥ २० ॥

तदन्वधिगत्य ताम्रातटिनीं तटिनीशसङ्गमिव मुक्ताफलाश्रय-तानुबन्धत इत्थमकथयत् ॥

करणीकरवाणि मे शिरः
प्रणतौ हि तरङ्गिणीपतेः ।
रमणीरमणीयवारिणां
शरणीकृततीरसाधुनाम् ॥ २१ ॥

इत्थमुदन्वन्तमवादीच्च —

जडाशयोऽप्येष तरङ्गिणीपतिः
सुतां सुतं च प्रददौ महात्मने ।
सरोजनाभाय मृडाय नो मतिः
प्रशस्यते दैवबलं बुधैस्ततः ॥ २२ ॥

सविनोदम् —

स्रोतस्विनीकमन एष जडाशयोऽपि
रत्नानि शङ्खनिचयानि च मौक्तिकानि ।
आस्ते पिधाय कृपणां निजवृत्तिमेव
सन्दर्शयन् लवणजीवन इत्यहोऽहम् ॥ २३ ॥

पुनः सकुतूहलम् —

गम्भीरोऽप्यम्बुनिधिः
प्रवृद्धसत्त्वो दिने दिने सोऽयम् ।
समभून्मलयौरस्यां
संसक्तात्मा स्थिरं शीलम् ॥ २४ ॥

मलयजासरिदीशसमागमे
तदनु सैष निमज्य मुहुर्मुहुः ।
सुमतिभिः समवाप्तसमेप्सितः
समगमत् स हि तां कुरुकापुरीम् ॥ २५ ॥

तत्र स मुहुर्मुहुरवगाह्य जलजाततीर्थं निगममौलिसारसूरसमुल्लास्यमानस्वान्तसरोजः अनुगतसज्जनजातः परिपूज्य तं जानकीजानिं जलजातादिभिः सुमजातैः सुजनसन्दर्शनसञ्जातमन्देतरप्रमोदं, कल-

श्रीसुतमिव कृपोपेतं, सुग्रीवमिव साङ्गदं इलावृतखण्डमिव वररत्न-कटकोज्ज्वलं, यादवसमुदायमिव गदोद्भासितं, यदुमिव दक्षरकरराज-मानं, रविमिव रथाङ्गनन्दकरं, गोधनमिव श्रीवत्ससंशोभमानं, प्रावृ-डभ्रमिव नीलाभ्रभासमानं, वाजिराजमिव ग्रीवाराजितदेवमणिं, सायन्तनसमयमिव पीताम्बरं, मानससर इव शिञ्जद्धाटकहंसकं, मत्त-मातङ्गमिव पराङ्कुशपरिष्कृतं सम्प्रणम्य तमादिनाथं निजविरचित-दिव्यप्रबन्धराद्धान्तवद्धशुद्धान्तःकरणैर्धरणीगीर्वाणगणैः पुनः पुनरनु-वर्ण्यमानगाथाशतं तं शठकोपमुनीन्द्रं सम्प्रणम्य च सानन्दमवादी-देवम् —

चिञ्चातरुतलनिलयं
कलये चेतसि पराङ्कुशाख्यं तम् ।
यत्सूक्तश्रुतिजलजे
बुधभृङ्गा अनुदिनं रमन्ते हि ॥ २६ ॥

तदनु देशिकोऽयं चिरन्तनसूक्त्यन्तमकरन्दसमास्वादनमिलि-न्दायमानमानसः सानुगः समासेवमानो मलयानिलसोदरीकूलयुगल-समुल्लसमानकमलाकमननिलयान् स्वसमागमसकुतूहलसकलपौरलोक-कोलाहलैः निषादिविषादितमत्तदन्तावळफीदकारैः प्रगृहीतप्रग्रहहय-हीङ्कारैः परितः प्रहण्यमानमङ्गलभेरीतूर्यानकपटहपणवघणघणायमान-घनततानद्धसमुद्भूतध्वनिमिश्र कोलाहलिते निखिलहरिदन्तराळे सस-म्पूर्णकुम्भमेव समासेवनीयः सम्पूर्णसर्वार्थोऽस्मद्गुरुरेष इति कर-सन्धृतदुग्धपूर्णस्वर्णकुम्भैः अभ्यागतोऽयं किमेतत्पत्तनोपान्तमिति-दिदृक्षयेव समधिरूढवरीणवरणतोरणैः पट्टणधरणीविबुधगणैरिव साल-भञ्जिकापुञ्जैः समुद्भासमानां, प्रासादप्रकरपुञ्जीभवदञ्जोपलसालभञ्जि-कानिकरायमाणनिर्जराधिराजराजिभिरधिराजमानां, प्रतिक्षणं विस्फुरत्-स्फटिकभित्तिगभस्तिधारामालाळीकात् दलितकुवलयदलवलदमननी-लमणिसौधदीधितिव्राततैललसितशिलीमुखकलितलेखश्वरालयविजय-जायमानार्जुनयशोराशिनेव समुल्लसन्तीं प्रतिसद्मप्रासादप्रबध्यमान-नवरत्नतोरणगणमयूखरेखां लेखेशशारशरासमधिमन्य नानटङ्किरा-

राममयूरकुटुम्बकदम्बकैरभ्युल्लसन्तीं, सुधाधवलमन्दराचलकूटकूटायमानचन्द्रशालावलिसमुल्लसितां, करतलकलितपद्मरागगारुत्मतविद्रुमवज्रत्रजिनीलमयूखकोरकाबलिमत्तया करयुगलनिरर्गलनिर्गळन्नळिनोत्पलविमलहसन्तीजातीपारिजातजाजीप्रमुखसुमसमुदायसमारूढशिरोगृहविप्रगृहिणीभिरिव प्रासादाग्रप्रकलितकल्याणसालभञ्जिकाभिरस्युल्लसद्भिः भवनवरैः परिशोभमानामुपचारितः पुरतः पुरतः समायातसज्जनैः सह सम्पूर्णकुम्भं समगत्य पुरीं पयःप्रदराभिधानां तत्र तत्र च परिपृष्टः सादरमुदारः सूरिजनैर्भावुकमतितरामानीतत्रिदशसरित्सलिलः मङ्गलेश्वरकरुणालोकनकलशकलितकौतुकाभिषेकः सम्परिक्रम्य तं मङ्गलेशं पचेळिमपूगपुन्नागनागकेसरसारसरसालपल्लवितानसमुद्भासितं द्विजगणपरिपठ्यमानमङ्गलपुराणवाणीरणितमुखरितदिगन्तराळगाससाद सदनं पित्रोः पदसारससेवनलालसः ।

ननाम पितरावयं प्रणतलोकसम्प्रार्थित-
प्रदानविलसन्मतिर्विमतपद्मिनीचन्द्रमाः ।
अनन्तगुणसिन्धुना समभवत्सुराजन्वती
स येन धरणीभवापतिपदाब्जभक्तिक्षितिः ॥ २७ ॥

तदनु देशिकोऽयं सुचिरसमागतस्वसन्दर्शनसमुदितसम्मोदमेदुरदेहां करुणामकरन्दानन्दमानसारविन्दामभियातं कथमेतावता भवता, वर्तितं च वृत्या कयेति पृष्टवतीं शिष्टमतिं तां निजजननीं प्रमोदोदन्वदुदरनिमग्नमानसः समभिदधावेवं गाथास्तास्ताः पुरा निजानुभूताः ॥

प्रादक्षिण्येन क्ष्मां
क्रमशो हि समस्ततीर्थानि ।
गाहं गाहं समगां
स्मारं स्मारं पदाम्बुजं युवयोः ॥ २८ ॥

तदा खलु कदाचित् समधिगतवति सनातनसरस्वतीतन्वतनुभानुतापतान्ते नितान्तं विन्ध्यानन्ताधरवरकटकोपान्तं पञ्चाननचापभञ्जकरामभद्राश्वतिनिर्वर्त्तनाय सञ्चिन्तयति मयि यदृच्छातः सम-

भिगतः कोऽपि धरणीगीर्वाणः अत्र खलु भगवन्, तापसस्वामिन् जानकीजानिचरणनीरजराजमानगाथामधुपानधौरेयमानसालिमञ्जुळतरानन्तवाचा वाचालद्विजगणपरिपठ्यमानालयलपितमौलिसारमुखरितहरितान्तरे मन्दानिललोलायमानकमलालयकेलिलोलमराळावल्यदृष्टचरप्रसूनसुमोत्पत्त्यभिव्यञ्जकसरोजिनीराजमाने पौराणिकवाणीगणगुणनकुशलशारिकाशुकपोतककमनीयकूजितश्रुतिशमितश्रान्त्यरात्यध्वनीनजनजातरञ्जितकान्तोपान्तकान्तारे कल्पानोकहविशङ्कटप्रकाण्डविटपायमानविटपाग्रकूटकूटनिकटप्रकल्पिततपोधनोटजाकल्पे अल्पेतरपल्लवपम्फुल्लमानप्रसवतुलसिकावनराजिराजमानोपवने दक्षिणतोऽत्रितपोधनराजोटजात् तप्तकाण्डजानकीकुण्डमण्डिते नृपनिकेतने इव नानावितानसमुद्भासिते विन्ध्यभूधरकटककानने निवसतु भवान् निर्वर्तयितुमाराधनं माधवस्येति समभ्यभाणीत् ॥

इदं श्रुत्वा गत्वा जननि तदहं काननवरं
रमानाथं नाथं निखिलजगतां तं रघुपतिम्।
यजन् मोदात्किञ्चिद्दिवसगणमत्र व्यपनयन्
समागान्मातस्ते चरणयुगसन्तानकृपया ॥ २९ ॥

अभिधाय चेत्थमभितुष्टमानसोऽस्मद्गुरुवर्यः यदुरघुवर्योदारलीलामनुदिनमाश्रावयमाणो जननीं जनकं च जाजीराजीत्वपारिजातजातीचम्पककुमुदकुन्दमन्दारवकुलतुलसीमालतीसुमनःसमाजैः परिपूजयंश्च सोपचारं जानकीजानिं क्षितिभृदध्यक्षेक्ष्वाकुसन्तानसागरसारङ्गलक्ष्मलक्ष्मणाग्रजन्मानं तत्समर्पितभैक्षमात्रनिर्वर्तितवर्ष्मरक्षणः उवास तत्र कतिचिच्छरदः पित्रोः परितोषाय ॥

तदानीं त्वनुदिनमविच्छिन्ननिजजननीपदपङ्कजपरिपूजनः पौरुषेयेतरभाषितशीर्षामृतसमास्वादनलसमानमानसः देशिकोऽस्माकं निर्वर्त्य शुश्रूषामशेषां निजतातजनन्योः नाभाग इव परित्यक्तभागः दूरीकृतविषयोपभोगः ऊरीकृतशरीरमात्रपरिग्रहः महीमिमां विचचार निर्विचारमेवम् ॥

पयःप्रणालीपुरतोऽनुगाद्यैः
सहाभिमुख्येन स ताम्रपर्णीम् ।
पुरं ययौ वेणुवनाधिराजो
वगाहमानः किल तत्र तत्र ॥ ३० ॥

तत्र खलु —

स्वदासलोकाय मुदःप्रदं सदा
फणीन्द्रपर्यङ्कवराधिशायिनम् ।
सरोजनाभं जगतामधीश्वरं
ननाम तं चापि सदाशिवं गुरुः ॥ ३१ ॥

तदनु देशिकोऽयं प्रस्थाय ततः शालिवाटिकास्थलादनिलाङ्कनपालकाचलकूटकलितवासं संसेव्य श्रीनिवासं स्वजनवचनश्रवणसन्धृतकङ्कणतामधुनापि परिसूचयितुमिव सज्जनानां किञ्चिदुत्तम्भितकायं भगवन्तं भवानीवल्लभमभिवन्द्य सुरेशं तं पुटार्जुनेशमभिष्टूय चाभिष्टवैरिष्टैर्गजराजसंसेवितराजीवराजमानपादपङ्केरुहं हंसासनसमाराधितनिजदेहं हंसवरशरणीकृतनिजचरणारुणाम्भोजं निजसौन्दर्यसमानन्दितधराबृन्दारकबृन्दं दन्तविजितकुन्दकुड्मलान्तं तं भगवन्तं मत्तमातङ्गवरदमभिवन्द्य समस्तावीद्देवं सप्रमोदमुदारगिरा ॥

अथ खल्वयमार्यवर्यो वर्यैः सह निजानुयायिभिः समागत्य सरसीरुहवासिनीवराहस्थलं निजामित्रद्विजराजविजिगीषयेव संरुद्धतदीयाध्वभिः, नक्षत्रैरिव सुधांशुकान्तैः, यात्रोद्यतमेदिनीनायकैस्त्वि सोद्यानैः, कल्पकवृक्षैरिव विविधाक्षयकोशभासितैः, विशालैरपि बहुशालैः, विधिविधुशचैरिव विश्वकर्मकरैः, भामिनीजनैरिव सुरताभिलाषिभिः, दोषज्ञैरपि गुणज्ञैः, शरणीकृतशर्वाणीपतिचरणैः, करुणार्णवार्णोजनिश्चरणारमणचरणारुणपुष्करषट्चरणान्तःकरणैः, धरणीगीर्वाणमणै रमणीयैः शरणवरीणैरधिरोचमाने नगरवरे विराजमानं वाजिमेधवाजपेयराजसूययागराजराजमाननैजाङ्गं शाणकोणकषणविमलमणिगणसमुद्भासमानमौलिं भगवन्तं तं कमलालीलालोलमनादिकोलं अभिवन्द्य सानन्दमभिष्टूयामन्दमिष्टजनतुष्टिप्रदमथ भारतसमा-

राङ्कणमिव कुम्भसम्भवसमुद्भासितं, सज्जनसमाजमिव मुक्ताफलाशयोल्लासमानं, नन्दनवनमिव नन्दनीयदेवदारुवृन्दं, चन्दनमन्दारकुन्दसहकाररसालसालतिलकतालतमालप्रमुखसालावलिसमुद्भासितमधिगत्य तं मलयाचलकूटमवगाह्य तीर्थवरं बाणतीर्थं तीर्थपादपादाम्भोरुहमध्वायमानगाथासुधाः समाश्रावयमाणः सानुयायिसज्जनजातं जातामोदः समाजगाम तत्र व्यतीतरात्रित्रितयः त्रिकूटधरणीधरेन्द्रं पापविनाशसरण्या ॥

तदनन्तरं पुनःपुनरवगाह्य चित्रानदीनिर्झरपूरं विरचितनैयमिकः अगाभरणमपि नागाभरणं, सदृष्टिमपि विषमदृष्टिं रक्तकण्ठमपि नीलकण्ठं गजाननराजीवमित्रमपि अगजाननराजीवमित्रं, निवारितकाममपि अनिवारितकामं भगवन्तं तमेनं पार्वतीरमणं सम्प्रणम्य प्रस्थाय ततः त्रिकूटशिखरिणः समधिगत्य पुरवरमभिनवधन्वापुरं समासेद्य गोदामन्वर्थयन्तीमभिधां निजामध्युवास च दिवसत्रितयं तत्र ॥

तदा तु कदाचित् क्षणदायाम् —

स्वापे स च सह शिष्यैः
कृतया तनुजापदे मुनिः सरिता ।
समगादेशिकनिकटं
गुरुराडथ तं जगावेवम् ॥ ३२ ॥

कस्माद्भवानिहागात्
सहानया भासमानया सरितेव ।
इति पृष्टो गुरुवर्यैः
स मुनिः सा चैवमाचचक्षाते तम् ॥ ३३ ॥

न हि गम्यमितो भवता
भवतापनिवारणाय सताम् ।
तत्रैव साधितं त-
द्वसतां तु पुरैव यात्रया भवतः ॥ ३४ ॥

कलशीभूरहमार्या
ताम्रा सेयं सुपर्वसिन्धुवरा ।
तुष्टयैव स तु तटेऽस्याः
सङ्गमभागे पुरे रमामूर्तेः ॥ १५ ॥

सीतारामगुरुर्मे
सादरगदितां तयोस्तदा वाचम् ।
शिरसा स तां गृहीत्वा
तथेति कुर्यां जगावेषः ॥ १६ ॥

तदा त्रियामा शान्ताभू-
न्मित्रद्विडिति पश्यताम् ।
सूचयन्ती नष्टतारं
परिक्षीणासितांशुकम् ॥ २७ ॥

तदनु देशिकोऽयं स्वप्नजातमर्थजातं सम्भावयमानः पुनःपुनः स्मारं स्मारमनुज्ञातस्ताम्रातटिनीकुम्भजातयोः अनिलोल्लसितत्रिदशालय-पद्मिनीपद्मायमानाभिः निखिलपुरवरविजयध्वजकाण्डायमानेषु केतु-दण्डेषु चकासन्तीभिरिव च कीर्त्यावलीभिर्दुकूलपताकाभिरुद्भासमानं झषभूषणसंसेवनसमागतवृन्दारकवृन्दायमानशातकुम्भसालभञ्जिकापरि-मण्डितचन्द्रशालामण्डलैः श्वेतद्वीपैरिव सुधाबिन्दुसन्दोहधवलैरब्धि-मेखलालेखाग्रेसरभवनवरैरभ्युल्लसन्तं कामिनीकुचकुम्भविजिगीषयेव प्राकारमधिरुह्य भासमानैश्चामीकरकुम्भैः समुल्लास्यमानमनवरतदह्यमान काळागरुधूमपटलधाराधरमालावलोकनादिव सदा नृत्यन्नीलकण्ठं निज-भवनमिवादभ्रविभ्राणां, सङ्केतनिकेतनामिव सौन्दर्यसुन्दर्याः, तदिन्दि-राबेरानगरं समासाद्य सह दासवर्गैः सुरनगरीमिव सश्यामां विचित्रा-मपि सचित्रां सज्जनावलिमिव बहुधान्यकार्यसम्पादिकां, दुर्जनतति-मिव सतामरसां, क्षितिपतितनयामिव नन्दिताळिगणां, सुयोधनायो-धनधरामिव कमलव्यूहप्रोल्लसन्तीं, मेरुगिरिमेखलामिव सुजातरूपां, अप्सरःसंहतिमिव समञ्जुघोषां, झषकुण्डलमण्डनस्याखण्डलनलिनीपल-

मणिमालायमानां निखिलतटिनीविरचितमानामपहसन्तीमिव पङ्केरुह-वासिनीसहचरचरणारविन्दगलितां जह्नुमुनिबालिकां फेनजालव्याजा-दलसामिव दुर्जनसङ्गभिया अस्मदार्यनिवासमहार्थीकृतऋषिकुल्याभि-धानां निदानं निखिलभुवनसम्पदां ताम्रपर्णीं तामवगाह्य मुहुर्मुहुः सहोत्साहमनुष्ठितनिजनैष्ठिकः अभ्रङ्कषसालावलिसमुल्लासमानं, पाञ्चाल-देशमिव पार्षदप्रवरराजमानं, केळिकाननमिव नाळिकेरबकुलकुरवकक-पित्थचम्पकसहकारबदरपारिजातपाटलतालतमालप्रमुखसालजालसमुल्ल-सितमिन्दिरारमणस्य मन्दिरं तदधिगत्य सानन्दमानन्दारविन्दनिरा-कृततारकान्तं कान्तं कमलावेरायाः, रायमाश्रितजनसन्दोहानां, दोहन-मानन्दसम्पदां, पदपल्लवविजितारविन्दमरविन्दबन्धुनयनं नयनं सज्ज-नावलीनामवलोकनानन्दितनिजलोकं, सुरनायकसङ्गीतमण्डपामिव रम्भापरिभासमानोरुप्रदेशं, कनकाचलमिव चामीकरमेखलं, सन्ध्या-समयामिव पीताम्बरं, सरस्तल्लजमिव पद्मोद्भासितं, कामधेनुव्रातमिव श्रीवत्सराजितं, किरीटमालिनमिव निजगुरुजातविचित्रमणिहारिणं, नभःकालिकनभस्तलमिव सदा हिमकरकुण्डलमण्डितं, पयसां निधि-मिव प्रवाळप्रोल्लसितकमलं श्रीवेरारमणमाश्रितजनशरणं करुणातर-ङ्गिणीरमणं सम्प्रणम्य पुनः पुनः झषभूषणं भगवन्तं समाराध्य तुलसी-कुसुमादिभिरुपहारैः, विलोकय चातकव्रातो जलधरव्रातमिव समानन्दि-तविमलस्वान्तः समस्तावीत् ॥

तदानीं खलु शरणीकृततरङ्गिणीपतितनयारमणारुणार्णोजनिच-रैणः सज्जनवरणीयगुणैररणीजनितकृशानुत्रितयतर्पणप्रवीणैः जानकी-रमणादिभिरिव दशरथसमाराधनधुरन्धरैः, सुरवैणिकवन्नारायणचरणा-रविन्दमकरन्दायमानगाधासमास्वादनानिपुणैः, वैवस्वतमनुवत् श्रद्धो-पेतैः, विप्रवरैरपि सप्रवरैः वैष्णवाग्रसरैः सम्प्रार्थितः सुतरां वस्त्वा चिरमत्रास्माननुग्रहीता भवतात् भवतापतप्तानिति देशिकोऽस्माकं तपोधनानामिव तुलसीकुसुमसंराजमानं धनाधिपधामेव मकरकुण्डल-सन्निधिभासमानं; नळकूबरचित्तमिव रम्भाविलाससमुल्लसितं कञ्चन निलयं समासाद्य साद्दरमाराधितः सज्जनैः समाश्रावयमाणो नारायण-

चरणारविन्दमकरन्दायमानगाथाः सुधावधीरिणीरनुदिनमाराधयंश्च निजान्वयनाथं रघुनाथं निवसति सुखमद्यापि ॥

अवेत्य मित्रागमनं द्विजेरितात्
तदागमज्जागरणं द्विजेश्वरः ।
गुरुर्ममायं करुणातरङ्गिणी-
तरङ्गसङ्घर्षितमानसो महान् ॥ ३८ ॥

प्रक्षाल्य पादावथ देशिकः कुशं
आचम्य चैकं परमास्तरं शुचि ।
कृत्वा तुलस्यम्बुरुहाक्षमालको
ध्यानस्य रामं विषयं ह्यचीकरत् ॥ ३९ ॥

आध्याननिर्धूतमलोऽमलो जपन्
लक्ष्मीपतेरेष ऋचोऽघमर्षणीः ।
सस्नौ स कल्याणगुणार्णसां निधि-
स्तास्रानदीवारिणि पापहारिणे ॥ ४० ॥

धृत्वाजिनं हारिणमेष देशिकः
पुण्ड्राणि स श्वेतमृदा तदाकरोत् ।
तानि प्रवृद्धप्रतिभाप्रवल्लरी-
पंफुल्लमानप्रसवा विरेजिरे ॥ ४१ ॥

ततः समाधाय मनः स सन्ध्या-
मुपास्य सम्यक् त्रिपदीं जजाप ।
सहस्रसङ्ख्यं च षडक्षरीं तां
निधाय रामं हृदि सद्गुणेन्दुम् ॥ ४२ ॥

सम्पादयामास चिरान्ममार्यो
राजीवजाजीतुलसीः सजातीः ।
समालती चम्पकपारिजात-
मन्दारकुन्दोत्पलपुष्पपूगाः ॥ ४३ ॥

अथागमन्मद्गुरुरेष सद्गुणो
निजोटजं शिष्यगणैः समन्वितः
यथात्रिजाबालिवसिष्ठकाश्यपाः
पुरातनास्तापससूरिसेविताः ॥ ४४ ॥

संविष्टरीकृत्य कुशं स देशिकः
कर्मांचकार प्रणतौ रघूद्वहम् ।
रामं सरामं समियाज जातमु-
द्राजोपचारैरुचितैरनन्तरम् ॥ ४५ ॥

गुरुरागरवैः पवित्रपात्रैः
रघुवल्लभमाराध रामम् ।
सहराममतीन्द्रियं मुनीना-
मपि तन्निजनेत्रमार्गपात्रम् ॥ ४६ ॥

दिननायककान्तिकाण्डपाता-
त्तदशर्मे निशावशा कृशाङ्गी ।
शुशुभे लपनाम्बुजेऽस्य वक्तुं
तिलकं कमनीयमागतेव ॥ ४७ ॥

अधिशिरस्तटमार्यसमर्पितं
मकुटमद्भुतरत्नपरिष्कृतम् ।
सुरवरेशशिलामयभूभृतः
कनककूटमिवास्य विराजते ॥ ४८ ॥

स दाशरथये तस्मै खर्जूरबदरीफलम् ।
सादरं देशिकोऽस्माकं सदाराय न्यवेदयत् ॥ ४९ ॥

अथ खलु सोऽयमार्यवर्यः समाराध्य चामराराध्यं भगवन्तं रामभद्रमध्यासीनो हरिणाजिनमास्तरणं समगायत निगमान्तसारं
[illegible]

रुचिरं चिरं लपनं न विलोकितमपि वास्या मया मनसाद्य ॥
चपलाभाचपलाभासुरासुराश्यद्य भाति मे मत्तेवेयम् ॥
मत्ते मत्ते विरोधः को मयि यासि ॥
किमियं सुमनाः सुमना विभाति मीनकेतनलक्ष्यतामधिगतेव चिरम् ॥
सुरतया सुरतया सनययानया क्रीडयामो यामो वयमेवमस्या वसतिम् ॥
सुतनु सुतनुराज्ञावशगोऽनङ्गोऽस्या यस्या यदीयोऽयं सदये दयां भवभूतिमती सुमतिर्मयि सततम् ॥
नाळीकेळिधरे नाळीकेळिधरेऽधरे समास्वादाय विलसन्मकरन्दैरेनं माम् ॥
सरया सरया याता वनिता कमलयामलया सहैषा सहेर्ष्येवास्मासु ॥
चामीकरकलशां चामीकरकलशां विलोकयथ साकूतमेतां पल्लविकाः ॥
मेखलायुतया मे खलायुतया बलयाबलया वसाम सहसामलहारया ॥
ललनालति लतिकाकाया यामिनीशं लपनप्रभयेयम् ॥
सा रमणी सारमणीयः संविमथ्नाति याति या मानसमपीयम् ॥
स्मरामि स्मरामितौजसः पादाम्बुजं तेऽतोऽरेः प्रहारं प्रहारं नयन् न यासि शं शरैरेनं माम् ॥
कलवल्लकी कलवल्लकीमियं रटयन्ती यन्तीव चित्रमहो समाह्वयति ये पुरतः पुरतः ॥
पलायते पलायते मकरकेतनस्य कामिमीनाकर्षणे सैषा सेर्ष्या वनिता या ॥
सुरासुरते सुरीसुरते सततं सततं सुरतं सुरते कृपयैतं पतितं पदारविन्दे भवती कुरुतात्त इति ॥

तदा खलु कदाचित् कुसुमसायकसायकश्चिलासारसारसाक्षेपद-सारससारसायमानमानसेषु विरचितचोळपाण्ड्यरसानिवासेषु सतामग्रे-सरेषु प्रसरत्कलिवैभवं न प्रभवेदत्रापि तत्र तत्रैव सर्वत इति तरसा तरसाशनप्रणीततापं देवदेवे वासुदेवे निर्जरकुलाध्यक्ष इव सहस्राक्षे सविनयमावेदयत्सु सुतरां कलिसङ्कुलतामपि सज्जनानां निखिलजनानु-ग्रहबद्धदीक्षो रक्षितनिखिलागमोदितकल्याणगुणः शिक्षितकलिकामादि-गणः लक्षितसकलकलापारावारपारः कृपापारत्नाकरः अस्मद्देशिकः शमदमादिधाम समाधाय तानेवमाचचक्षे —

स्मरतातं स्मरता तमुत्तीर्यते भवाम्भोधिः ॥

भव भीतो भवभीतोपास्यं रसजास्यं भर्तारं भक्तारं मायाः ॥

कीर्तयतालं कीर्तयता लंकेशानुजेन जितमजितपदं तमतो जग-दीशमपि ॥

अर्चयतैतमर्चयतैतं येन मेतं भूयते भवति प्रातिहारिकोऽयं यत-स्तमतः सततम् ॥

प्रह्लादं प्रह्लादं दितिनन्दननन्दनमिन्दिरानन्दनो वन्दनेन कृतवान् सदयालुः ॥

बृन्दारकबृन्दवन्दितं बृन्दावनमन्दिरानन्दिनं नन्दनन्दनं वन्दत भवन्तः ॥

भक्तारं भक्तारं भजतारं कमितारं जगतामजातकभ्याः सुजनाः ॥

राधया महितं गोपालमाराधयाम हितं गोपा लम्येहा मद्यमराः ! महतेह हवेन भविताऽतो जगतां सुतरां सुमतिः ॥

इत्थमभिहितवति महितं हितं परमहंससार्वभौमे गुरुवर्ये समभिनन्द्य तमनुष्ठेयः सप्तदिनसप्ततन्तुर्जगतां भवता भवतापनिवारणायं करुणात इत्यत्यर्थमर्थयत्सु तेषु धरणीसुरसार्थेषु तरसा सरसार्थं निगमसार्थशिरोरसं संविवक्षुः सप्तादिनैरदीनमानसः समारभतैवं यथाविधि यथा विधिनन्दनो नारदः ॥

देशिकः कारयामास सप्ताहाध्वरमण्डपम् ।
श्रीवेरानगरे रम्ये श्रीवेरापुरतस्ततः ॥ ६१ ॥

तत्र हि—

सुरत्नमणिकुट्टिमे मणिगणैस्तदा मण्डिते
लसद्ध्वजपताकिका अनिलचालिता रेजिरे ।
सुदूरनिवसद्द्विजानिह महानगाह्वाध्वरो
भविष्यति समाह्वयन्त्य इव शङ्खचक्राङ्किताः ॥ ६२ ॥

घटितमाणिकवाटो यज्ञवाटस्तदानीं
चतसृषु हरितासु प्राप्तपक्षीशकेतुः ।
इम इति सुजनानां सूचयद्द्वारनर्यै
र्विलसति पुरुषार्थानां चतुर्णां हि मार्गाः ॥ ६३ ॥

विशङ्कटपताकिकाप्रकरमण्डितं मण्डपं
विवेश स गुरू रमापतिनिकेतचेता मुदा ।
पयोधितनयातनोर्नगरवासिभिर्भासुरै-
र्धराविबुधशेखरैरखिलसत्तमैः संयुतः ॥ ६४ ॥

अथ खलु गगनमिव सद्गुणं, तपोधनसदनमिव वितानसमुद्भासितं, वैरोचनिवाजिमेधशालाभ्यन्तरमिव सप्तवेदिकं, सप्तदिननिर्वर्तनीयसप्ततन्तुमण्डपमध्यमध्यासीने नारायण इव करुणार्णवे कलानिधाविव कुवलयानन्दसम्पादके, गौतम इव न्यायशास्त्रप्रवर्तके, पाणिनाविव प्रकृतिपुरुषप्रत्ययप्रकाशके, वार्तिककर्तरीव वररुचौ, जैमिनामिव विबुधविग्रहनिवारके, पर्जन्य इव साधुजनतापनिवर्तके, सुरतोत्सुककार्तवीर्य इव संभ्रितनर्मदे, अत्राविनासूयाश्रये, समीरण इव सदागतौ, काव्य इव कवौ, गीष्पताविव विबुधगुरौ, वरुण इव प्रचेतसि, धनाधिप इव विविधार्थसङ्ग्रहीतरि, भवानीवल्लभ इव कलानिधिशेखरे, धर्मात्मज इव सदा सविजये, विजय इव सुभद्रान्विते, स्वायम्भुवमनाविव सत्प्रियव्रते, महाराज इव सदाचारसम्पन्ने अस्मद्गुरुवर्ये समाक्रमत्वल्पीयः सुकृतं दीनलोकोऽयमिति समुपक्रान्तवति क्रतुं सप्तदिननिर्वर्त्यमानं अतितरां निर्वृतचेतसः सरसीरुहमिव हंसाः, पारावारमिव सरि-

त्पूराः, दातारमिव याचितारः, भागीरथीमिव यात्राभिलाषिणः, प्रपामिव तृषिताः, दिनकरमिव कोकाः, चन्द्रमसमिव चकोराः, दाशरथिमिव कलशीभवादयः समाययू रमारमणचरणारुणाणोंजनिशरणाः धरणीगीर्वाणगणाः संवदन्तः परस्परमेवम् —

नरवरा वरवराहचरितं ललितं भवितात्र श्रुतिसरणीशरणम् ॥
नरके नरकेसरीन्द्रचरणारविन्दमकरन्दं पिबामो न सरामो वराः ॥
विहरामारामा रामारामे सहरामे सततं रसिकाः ॥
धीवरा धीवरानवलोकयत जानकीशरक्षितान् भक्तेः ॥
सुगतेऽसौ सुगतेऽसौ न रमारमणपदं सम्पादयेत् ॥
कलिले कलिलेलिहानगरैर्मनःकमले विनतासुतेशं भजामो रमेशम् ॥
यामो या मोहपटलतूलवात्याश्रोतुं तां हरिगाथां नगाहशालाम् ॥

तदनन्तरं सुरवरेष्विव सुधर्माश्रयेषु, प्रहर्तुमुद्यतेष्विव प्रवृद्धसत्त्वेषु, कामिजनेष्विव रामानुरक्तहृदयेषु, धराधरवरेष्विव प्रवृद्धवंशेषु, हेमन्तार्गणेष्विव हिमशीतलमानसेषु, द्वन्द्वायोधनधुरन्धरचाणूरप्रमुखयोधेष्विव श्रीपतेश्चरणानुबद्धरागेषु, सरोरुहेष्विव हंसपादसङ्गमरुचिरेषु, धनदात्मजेष्विव स्वतःसिद्धसर्वार्थेषु, धरकन्यावल्लभवत् सभापतिषु जितकामेषु च, सप्तद्वीपेष्विव सकुशेषु केषुचित् , सुरवैणिकेष्विव विरचितमहेन्द्रोपान्तवासेषु केषुचित् , द्वारकानगरवद्यादवक्षितिभृन्निवासेषु केषुचित् , कावेरीकनकापूरेष्विव कुटकाचलसंश्रयेषु केषुचित्, नक्षत्रगणेष्विव पुष्करालयेषु, गोवृन्देष्विव वृषप्रवृद्धरुचिषु समुपविष्टेषु तेषु परमहंसेषु शृण्वत्सु सहर्षं सहर्त्विग्गणं समारभत यथाविधि निगमान्तसारम् ॥

तदनन्तरं यथाविधि निर्वर्तिते च सप्तदिननिर्वर्त्यमानसप्ततन्तुमहोत्सवे अमित्रता त्रियामासु, सतामरसता कमलिनीषु, कलाहीनत अमायां यामिनीशस्य, शृङ्खलाबन्धः प्रबन्धेषु, संसारः शिलाविशेषेषु, मित्रच्छादनं दुर्दिनेषु, अपारिजातता जनेषु न मालासु, क्षमात्यागो हर्यक्षकेतौ, मित्रहानिर्निशासु, सदप्रकाशो दिवसेषु, पलाशसङ्गृहीतिरुपनीतिकर्मणि, कलानिधिविद्वेषः सैंहिकेये, दुर्वर्णयोगश्चरणाभरणे, हिरण्य-

हारिता वराहतनोः, अनम्रता तृणराजेषु, यमोल्लासो निगमेषु, मन्दता शनैश्चरस्य सत्सु रागाभावो रसातललोके, वंशविच्छेदो वेणुवनेषु, स्नेहहानिः प्रवृद्धदीपेषु, अपवादः शास्त्रेषु, सुकृतनाशस्त्रेताप्रारम्भे न जनेष्विति परमेवं व्यवस्थितम् ॥

तदा खलु कदाचिद्विदां वरेभ्यः समुपदिशन्तं वेदान्तसार-मधिरोहणभूमिमिव विद्यालतायाः, सङ्केतनिकेतनमिव श्रीनिकेतनपा-दकमलभक्तिमत्तकाशिन्याः, कन्दमिव परमानन्दमन्दारपादपस्य कोश-गृहमिव सदाचारसम्पदां, निजसदनमिव शमदमौदार्यसौन्दर्यादिगुणा-नां, अश्मसारमिव कुसुमेषुपृषत्कानां, गरुत्मन्तमिवामर्षकुम्भीनसस्य, द्वादशात्मानमिवान्तरतमसो निवर्तनाय समाविर्भूतं वसुधातले, डिण्डीर-खण्डैरिव निखिलकलानिर्जराणां जिह्वाग्रसिंहासनहंसवाहनमाहिळाकोळि-कुन्दकुड्मलैरिव च संराजमानैः अपारविद्यापयःपारावारान्तरसञ्चरत्तरङ्ग-वर्गपारम्परीरीतिमनुसन्दधानैर्दशनैः परिशोभमानं, लावण्योदधिविद्रुमा-यमानाधररागकमनीयमुखं, ज्ञानवैराग्ययोः हृदयविहारमण्डपारोहणाय-माननळिनाक्षतुलसीमणिमालासमुल्लसिततनुं, ब्रह्मवर्चोलहरीमिव यज्ञसू-त्रिकां दधानं, महावराहमिव श्रीवत्सगोत्राभिरामं, धनाधिपमिव पुण्य-जनाग्रगण्यं, त्रिदशेश्वरमिव वृद्धश्रवसं, धूर्जटिमिव शुचिजानितनयं, सुग्रीवमिव हरिजनाध्यक्षं, वृत्तलक्षणमिव शार्दूलविक्रीडितोल्लासितं, दशरथमिव सुमन्त्रसाधितसर्वार्थं तं निगमान्तसारविवृतिकान्तारान-वरतकलितलीलं, कमलाललनचरणकमललीलाविमलपीयूषसमास्वादन-लोलं, विमतमतमतङ्गजविजयसन्धृतमृगराजलीलं सीतारामाभिधानधेयं निगमान्तसारगुरुं, कल्पानोकहमिव याचकाः, धेनुमिव वत्साः, पुरन्दरमिव बृन्दारकाः, त्रिपदीमिव मन्त्रार्थाः, राजानमिवोपजी-विनः, महापुरुषमिव महालक्ष्म्यः, नळिनीमिव मराळाः, कमलाका-न्तमिव चिरन्तनोक्त्यन्ताः, प्रजेश्वरमिव प्रजाः, सङ्घशः समाययुः सज्जनाः ॥

तदानीं खलु हंसा इव सारासारविवेचनचतुराः, गीर्वाणा इव धिषणोत्कृष्टाः विपश्चितोऽपश्चिममनीषाः, मित्रोदय इव सारस-

ब्राताः, प्रोषितपतिदर्शन इव पतिव्रताः, शरदागम इवाकाशाः, हिमांशुदर्शनादिव कुमुदाकराः, वर्षासमय इव मयूराः, निधिसमधिगम इव निर्धनाः, सासारवारिदसन्दर्शनं इव चिरोपोषितचातकाः, इन्द्रवध इव विबुधाः, चिन्तामणिप्राप्ताविव चिन्तितसिषाधयिषवः अस्मदाचार्यसन्दर्शनतः सुतरां सम्प्रवृद्धविस्मयातिरेककोरकास्तमभिवन्द्य पुनः पुनः सञ्जगदुरेवं सज्जनाः —

श्रीमच्छुकाभिधानै-
रार्यैर्यद्भाष्यरत्नमाभाषि ।
उपदेष्टव्यं भवता
तद्भवतापापनोदनं कृपया ॥ ६५ ॥

अस्मद्गुरुवर एष स
उपादिशत्करुणयाथ तद्भाष्यार्थम् ।
अवहितमनसस्तं ते
सञ्जगृहुः सादरं सहोत्साहम् ॥ ६६ ॥

तदानीं खलु मिहिरकरविहार इव हिमसङ्घाः, भार्गवरमणसमाविर्भाव इव महामायाः, ग्रीष्म इव क्षुद्रापगाः, प्रत्यूषारम्भ इव क्षणदाः, जाज्वल्यमानज्वलनालिङ्गन इव पतङ्गाः, चक्रवातान्तर्गता इव तूलल्वाः, केसरिगणविलोकन इव करिणीशावगणाः, कर्णशष्कुलीसम्प्ररोहन्महारुजां जनानां भेरीध्वनय इव श्रुतितापकारिणः, अहर्गणा इव सत्पदार्थहीनाः, योधाग्रेसरा इव परलोकनिरोधकाः, गाढान्धकार इव प्रत्यक्षदृश्यमानद्रव्यापोहकाः, शिशुपालपौण्ड्रकसाल्वादय इव परब्रह्मावाच्यवाचकाः, वेनादय इव पुरातनगिरामानर्थक्यनिर्धारकाः, वेदविरुद्धसिद्धान्ताः वैनतेयविद्रावितवाताशना इव शकलीबभूवुर्नितराम् ॥

तदानीं खलु सज्जनास्ते परमहंसपरमगुरुसमुपादिष्टं तदनिशमिष्टार्थपूर्त्यै परिपठन्तस्तमस आन्तरस्य निवर्तनतः परिमितेतरपारितोषमवाप्तवन्तः ॥

एवं दिशन्नतितरां गुरुसार्वभौमः
सर्वाः कलाः सकलसूरिजनेभ्य एषः ।
संराजतेऽप्रतिसमं स यजन् रमेशं
सप्ताहयज्ञनिजदेशिकपूजनाद्यैः ॥ ६७ ॥

श्रीबेरापुरवरवाससाभिलाषो
भक्त्यास्मद्गुरुवर एष वैष्णवाग्र्यैः ।
तत्रत्यैरनुसवनं सुपूज्यमानो
विप्रैस्तत्पुरवर एव सञ्चकास्ति ॥ ६८ ॥

श्रीसीतारामपादात्समजनि विबुधावासवासं च लेभे
व्याप्ताकूपारपारं बहुतरवरगाङ्क्षेयभूरप्यवाप्ता ।
शुद्धा सिद्धान्तरङ्गोल्लसदमलगुणा कीर्तिमव्यापगाग्र्या
विध्वस्ताघौघसङ्गा त्रिभुवनशुभदा नित्यदा सञ्चकास्ति ॥

सीतारामगुरोः पदाब्जयुगळं कारुण्यवारांनिधे-
रस्मन्मानसषट्पदस्य सदनं सन्तः समाचक्षते ।
आस्तामेतदियं तदीयकृपया निर्वर्तिता मत्कृतिः
नूनं तस्य वदेदिह श्रवणयोरेकान्तभक्तं च माम् ॥ ७० ॥

मम तु भवविषाब्धौ जन्म भूयो न भूया-
द्यदि भवतु तदानीं रामपादाब्जभक्तिः ।
इति मम हृदयस्थं भावमन्वीक्ष्य सम्यक्
स हि खलु करुणाब्धी रामभद्रो विधत्ताम् ॥ ७१ ॥

नवपदमणिव्रातं हारं सुवर्णगुणोज्ज्वलं
इति जलजनिं वक्त्रार्थं तं त्रिवारविशोधितम् ।
वरतररसं युक्तं भावैः शुभध्वनिभासुरं
कुरुत सुधियः प्रीत्या कण्ठे सदा नतिरस्तु वः ॥ ७२ ॥

सीतारामोद्भूतां सुकविमनोरञ्जकाभिधां मालाम् ।
नवरससमुल्लसन्तीं धिषणारामाः कुरुध्वमवतंसम् ॥ ७३ ॥

श्रीमत्कुरुङ्गनगरे निवसन् लक्ष्मीसतीमणेः सूनुः ।
सीतारामाख्यसुधीर्व्यतनोन्निजदेशिकस्य चारित्रम् ॥ ७४ ॥

सीतारामगुरूणां चित्रचरित्रप्रकाशकः सोऽयम् ।
कल्पद्रुस्तत्करुणापयसा संवर्धिताश्चिरं जीयात् ॥ ७५ ॥

गोलीलोपेतैस्सत्पद्यैर्गद्यैः सचिन्तकार्थैश्च ।
कविचित्तरञ्जकोऽयं राजत्वासोमभास्करं राजन् ॥ ७६ ॥

इति गर्गकुलशेखररामकृष्णाचार्यसुत-
सीतारामसूरिविरचिते कवि-
मनोरञ्जके चतुर्थोल्लासः ।

पञ्चचत्वारिंशदधिकसहस्राब्दे वैशाखमासि एकोनविंशद्दिवसे भूसुत-दिने शुक्लप्रथमायां सायाह्नसमये एष कविमनोरञ्जकाख्यकाव्यग्रन्थः लिखित्वा समाप्तिमगात् ॥

श्लोकानुक्रमणी ।

श्लोकः	पृष्ठम्	श्लोकः	पृष्ठम्
अगाधधिषणाः (2. 31)	28	आम्नायचूडारस (1. 11)	3
अजामिलमुनेः (3. 2)	43	आलोक्य तत् (2. 52)	33
अञ्चति (4. 58)	81	आलोच्यायं (3. 45)	53
अणूदरीणां (1. 31)	6	आशानिवारण (1. 77)	15
अतनुताप (3. 76)	62	इदं श्रुत्वा गत्वा (4. 29)	73
अथ यत्र देव (2. 50)	33	इन्दिरारमण (4. 10)	67
अथागतं तं (2. 18)	26	इहामनन्तीति (3. 16)	46
अथागमत् (4. 44)	79	उत्तुङ्गयत्पर्वत (3. 54,	5.)
अद्वैतवाञ्छां (1. 51)	10	उदग्रयत्स्फाटिक (1. 26)	5
अधित्यटनिकटं (3. 86)	63	उपदिदेश (2. 25)	27
अधिशिरस्तटं (4. 48)	79	उपोषणे (1. 49)	10
अनादिवाणी (1. 8)	2	उवोच केदारं (2. 49)	32
अनिर्गल (3. 29)	49	एनां पुरीं (2. 55)	34
अनुदिनमेवं (4. 60)	81	एवं दिशन् (4. 67)	88
अन्तर्वाणिवरीण (4. 1)	65	एषोऽनन्त (3. 44)	53
अभिनवघन (3. 63)	58	कतिचिद्वासरान् (1. 88)	20
अमन्दमोदं (1. 15)	3	करणीकरवाणि (4. 21)	70
अमर्त्यराजः (2. 69)	40	कराञ्जलेन (1. 23)	4
अर्भकोदय (1. 74)	15	करुणावरुणालयः (4. 7)	66
अवेत्य मित्रागमनं (4. 38)	78	करैः समालिङ्ग्य (3. 23)	47
अद्रिरस्मिन् (1. 57)	11	करोति प्रातिलोम्येन (2. 68)	39
अस्मदीप्सित (3. 42)	52	कलत्रमित्रेण (1. 81)	16
अस्मद्गुरुः (2. 36)	30	कलशीभूरहम् (4. 35)	76
अस्मद्गुरुवर (4. 66)	87	कल्लोलकोलाहल (4. 17)	69
अस्मेहिक (3. 26)	49	कस्माद्भवान् (4. 33)	75
अहामधीशः (3. 71)	61	काञ्चीमण्डल (1. 64)	12
आकर्ण्य सादरं (1. 67)	13	काञ्च्यां गौतम (2. 17)	26
आजगाम (1. 73)	14	कान्तानसङ्ग (1. 22)	4
आदौ वेदगणैः (1. 83)	19	कालीयसरसि (2. 35)	30
आप्यानन्निधूत (4 40)	78	काले ततः (2. 57)	35

श्लोकः	पुटम्	श्लोकः	पुटम्
काव्येषु बन्धं (1. 48)	9	तत्राथ भक्तप्रवरेण (2. 2)	21
काशीमवाप (3. 5)	43	तत्राथ संसेव्य (2. 37)	30
कुमुदं मुमुदे (3. 24)	47	तथा खलु (3. 87)	64
कुम्भमासि (1. 71)	14	तदतनुसमरो (3. 31)	50
कुम्भोद्भवः (1. 46)	8	तदनन्तरं (3. 21)	46
कृष्णाध्वरीन्द्रः (1. 6)	2	तदनु सुन्दर (4. 11)	67
को वा वर्णयितुं (2. 13)	24	तदनु सैष (4. 9)	,,
क्वचित् क्वचित् (3. 32)	50	तदवकर्ण्य (3 66)	59
क्षेमाय मे (1. 13)	3	तदाभवद् (3. 85)	68
खचपद्यमय (1. 52)	10	तदा त्रियामा (4. 37)	7
गन्धर्वोर इति (3. 41)	51	तदीयवाचा (4. 12)	67
गम्भीरोऽपे (4. 24)	70	तदेतन्महसां (3. 20)	46
गुरुरागरवैः (4. 46)	79	तद्राजा (3. 6)	32
गोकर्णमूर्तिं (2. 12)	24	तस्माम्मरोचि (2. 14)	24
गोलीलोपेतैः (4. 76)	89	तस्मिन् गृहे (2. 61)	37
ग्रामेऽस्मिन् (1. 65)	12	तातो मे सुचिरं (1. 12)	3
घटितमांग (4. 63)	84	तुषारधर (1. 40)	7
घटीवधूत्यः (3. 12)	45	तुष्टाव सन्तुष्ट (3. 18)	46
चामीकर (2. 61)	36	तं पार्थसूतं (2. 3)	21
चिन्तातरुतल (4. 26)	71	तं मुदा देशिको (3. 17)	46
चिरन्तने (1. 62)	12	त्र्यन्तसारं (4. 53)	80
जडाशयो (4. 22)	70	दत्ताद् वाण्यभिविश्य (1 4)	1
जघभूष (4. 50)	80	दनुजकुल (3. 64)	58
डोलालीला (4. 57)	,,	दिननायक (4. 47)	76
ततः पुरी (2. 20)	26	दिने दिने (4. 4)	66
ततः समाधाय (4. 42)	78	देशिकस्तत्र (3. 4)	43
ततो निवेदितैः (4. 52)	80	देशिकः कारयामास (4. 61)	84
ततो बिन्दुसरो (2. 29)	28	दोषान् परित्यज्य (1. 53)	10
ततो ययौ (2. 23)	27	द्विजराज (1. 79)	15
ततोऽस्मदार्यवर्यः (2. 10)	23	धर्मात्मजस्य (2. 51)	33
ततो हरिद्वारं (2. 41)	31	धर्मात्मजो (1.44)	8
तत्रत्यमायामय (2. 24)	27	धिषणाधिषणान् (4. 54)	80
तत्र वीक्ष्य (3. 90)	64	धृत्वाजिनं (4. 41)	78
तत्र वेङ्कटरामेण (1. 66)	13	ननर्त रत्नाकर (4. 16)	68

श्लोकः	पुटम्
ननाम पितरावयं (4. 27)	72
नवद्विवादित्र (1. 86)	20
नवपद्मणि (1. 72)	88
न हि गम्यमितो (4. 34)	75
नाथः पङ्कजनाभ (1. 85)	20
नारायणपदाम्भोज (2. 2:)	27
नारीं सभां (1. 32)	6
निरपायवचः (1. 16)	3
निर्गम्य काञ्च्याः (3. 88)	64
निर्जगाम (2. 39)	30
निर्मथ्यमाने (3. 82)	63
नूनं यदाराम (1 39)	7
पण्यवीथिषु (3. 11)	44
पत्रदानमपि (3. 73)	61
पदा क्रमितुं (4. 15)	68
पद्मालयेशस्तु (1. 43)	8
पयः प्रणाली (4, 30)	74
पादपान् (3. 72)	61
पायसामृत (2. 56)	34
पावमानि (3. 6)	43
पीयूषपूरः (1 42)	7
पुष्पे जजान (2. 58)	35
पूजयामास (4. 53)	80
प्रक्षाल्य पादौ (4. 39)	78
प्रतिक्षणं (3. 77)	62
प्रमदाः प्रमोद (3. 30)	50
प्रविवेश पुरी (1. 87)	20
प्रस्थाय तस्मात् गुरुः (2. 9)	23
,, (2. 30)	28
,, गुण (2. 11)	23
प्रस्थाय बाणासन (4. 18)	69
प्राचीनकाव्येषु (1. 58)	11
प्राचीनसूक्तिमय (3. 91)	64
प्राचीनसूक्तिरस (1. 59)	11
प्राचीनहारेषु (1. 47)	9
प्रादक्षिण्येन (4. 28)	72
प्राप्तौ वैश्रवणात्मजौ (2. 38)	30
प्रावृड्विष्णुः (3. 75)	62
प्रासादाग्र (1. 35)	6
फणाधर (3. 61)	56
फलभरानमिताः (1. 67)	38
बदरीवनमाययौ (2. 47)	32
बहुपल्लव (3. 36)	51
ब्रह्मप्रार्थनया (2. 25)	27
बाल एष भविता (1. 76)	15
भजताज्जडाशय (1. 54)	10
भवानुरागं (1. 50)	9
भव्याय भूयात् (1. 14)	3
मत्वा यदुर्वीधर (3. 60)	56
मत्सूनुभग्ना (3. 55)	55
मदनाय तदा (3. 28)	49
मधुनार्पितं (3. 40)	51
मधुव्रतवस्थिनी (3. 34)	50
मध्येपथं (2. 60)	36
मम तु भवविषाब्धौ (4. 71)	88
मर्मवित्सो (1. 56)	80
मलयजा (4. 25)	70
मलयानिल (1. 17)	3
महाविलं वीक्ष्य (2. 5)	21
माणिक्यदीपैः (2. 63)	37
मातामहो (1. 10)	2
माधवस्य विविधेषु (3. 38)	51
मुक्तामयैः (2. 62)	37
मृगनाभ (3. 52)	55
मेखलालपन (2. 71)	42
यच्चन्द्रशालालय (3. 9)	44
यच्चन्द्रशालासु (1. 24)	5
यत्पत्तमे केलिवन (1. 35)	6

श्लोकः	पृष्ठम्	श्लोकः	पृष्ठम्
यत्पत्तने राजति (1. 33)	6	यो भूधरः (3. 19)	56
यत्पत्तनोद्भासित (1. 38)	7	रघुपतिः (2. 65)	38
यत्पत्तनोद्यान (1. 36)	6	रघुवर (2. 72)	42
यत्पादाब्ज (1. 3)	1	रघुवंशभवा (4. 14)	68
यत्र यत्र गुरुः (2. 4)	21	रङ्गशमुक्तामय (4. 3)	65
यत्संसेवनतो (1. 5)	2	रचितद्विजवर (4. 59)	81
यत्स्फाटिकोत्तुङ्ग (3. 58)	56	रमणीयतमां (3. 62)	56
यत्क्षोणीधर (3. 46)	54	रमानिवासा (3. 79)	62
यत्सौधकूटालय (3. 8)	44	रसारुहाणां (3. 78)	,,
यत्सौधकूटेषु (1. 25)	5	राजते स खलु (3. 57)	51
यदद्रिकूटं (3. 51)	54	राजीवराजी (4. 5)	66
यदद्रिकूटोपरि (3 49)	,,	राजीवराजत् (2. 8)	23
यदद्रिरामा (3. 53)	55	लक्ष्मीधाम (1. 1)	1
यदद्रिवापी (3. 50)	54	लोकबान्धव (1. 12)	14
यदद्रिशृङ्गोपरि (3. 56)	55	लोष्टीकृत (4. 20)	69
यदद्रिसद्म (3. 47)	,,	वज्रिनील (3. 10)	44
यदापगागार (2. 44)	31	वत्सवंश (1. 78)	15
यदि राशि (3. 65)	59	वन्दे सेतुं (4. 13)	68
यदीयपानीय (2. 42)	31	वरणतरंग (3. 14)	45
यदीयवाचालहरी (1 7)	2	वरुणालय (4. 8)	66
यदीयसौध (1. 18)	4	वसन्तसमये (3. 43)	52
यदीयसौधाग्र (1. 28)	5	वाराणसी (3. 15)	45
यदीयसौधाचल (1. 3.)	,,	विचित्रनानाविध (4. 2)	65
यदीयसौधालय (1. 21)	4	विजहौ विधुरपि (3 74)	61
यदीयसौधे (1. 29)	5	विदां प्रसङ्गेषु (1. 9)	2
यदूर्मिमालासु (2. 45)	32	विनीतपाकाहंत (4. 6)	66
यद्गोपुराग्र (3. 7)	44	विपञ्चिकातापस (2. 48)	32
यन्नरिनरिन्ध्र (2. 43)	31	विमथ्यमानात् (3. 81)	63
यस्मिन्नुपादाय (1. 37)	7	विमलाप्सरसां 3. 84)	,,
यस्याः श्रीतुलसी (2. 34)	30	वियत्करेणुः (3. 48)	54
यातावुभौ (2. 26)	25	वियत्करेणौ (3. 47)	,,
यातेषु हायन (1 70)	14	विलोभनीया (1. 41)	7
यासां चाधर (3. 25)	47	विशङ्कट (4. 64)	84
योऽन्तः प्रविष्टो (3. 19)	46		

श्लोकः	पृष्ठम्	श्लोकः	पृष्ठम्
वीरराघव (3. 89)	64	सांयुगीनजन (3. 33)	50
विन्ध्याद्र (3. 70)	61	सीताभिधां (1. 68)	18
विश्वेशसेवा (3. 13)	45	सीतारामगुरुर्मे (4. 36)	76
वेदव्रात (1. 82)	18	सीतारामगुरुत्तमः (2. 54)	34
व्रातो मरुतां (3. 80)	62	सीतारामगुरूणां (4. 74)	89
शताग्रमातङ्ग (2. 19)	26	सीतारामगुरोः (1. 63)	2
शुक्लागमे (3. 69)	61	सीतारामगुरोः (4. 70)	88
शृङ्गारराज्ये (3. 27)	49	सीतारामतनूजया (1. 69	14
शृङ्गिवेरपुरं (3. 3)	43	सीतारामाभिधो (2. 28)	27
श्रीनारायणसेवन (2. 7)	22	सीतारामोद्भृतां (4. 73)	88
श्रीनारायणमन्त्रिणा (2. 21)	26	सीतासमेतो (2. 59)	36
श्रीवेरापुर (4. 68)	88	सीते चिन्तित (1. 2)	1
श्रीमच्छुकाभिधानैः (4. 65)	87	सुधादीधिति (3. 22)	47
श्रीमत्कुरङ्गनगरे (4. 74)	88	सुधामयान् (1. 19)	4
श्रीराममन्त्रान् (2. 27)	27	सुरत्नमणि (4. 62)	84
श्रीसीताराम (4. 69)	88	सूर्यनारायण (2. 15)	24
सकलतापस (2. 66)	38	सेऽयं हि गङ्गा (3. 46)	32
सत्कान्तबालोदय (1. 75)	15	संविष्टरीकृत्य (4. 46)	79
स ततः तद्गुण (2. 33)	29	संसारेषु (3. 83)	63
स दारपरिमोदाय (2. 70)	41	संसेव्य कल्याण (1. 84)	69
स दाशरथये (4. 49)	79	संसेव्य देवं (2. 53)	33
सन्दृश्य तां (3. 67)	60	संसेव्य भक्त्या (3. 68)	60
सन्ध्यासु (1. 27)	5	स्तुत्वा ततो (3. 1)	43
समभिषिच्य (4. 19)	69	स्नात्वा चक्रसरोवरे (2. 1)	21
समिन्धमाने (3. 39)	51	स्फुटेतरार्थोपि (1. 60)	11
समीक्ष्य (1. 20)	4	स्रोतस्विनी (4. 23)	70
सम्वादयामास (4. 13)	78	स्वदासलोकाय (4. 31)	74
स रङ्गपुरवासिनं (3. 92)	64	स्वदेत काठिन्य (1. 61)	12
सलिलमवजगाहे (2. 40)	31	स्वाभे स च (4. 32)	74
सा दृष्ट्वा (1. 80)	16	हर्योरसो (1. 45)	8
सायन्तनोचितं (4. 55)	80	हिरण्यहारिणे (2. 32)	29
सारप्रधानो (1. 55)	11	हृष्यन्त्यसन्तो (1. 56)	11
सारसोल्लासित (3. 30)	50		